तत्पट्टे वरगुणमणिगणरोहणभूधरापीठे ।
सांप्रतमद्भुतयशसो विजयसेनसूरिवराः ॥२॥ गीतिरियम् ॥
वाचकचूडामणयः श्रीमन्तः शान्तिचन्द्रनामानः ।
विद्यागुरवो विबुधा विजयतां कमलविजयाश्च ॥३॥
एषां श्रीसुगुरूणां प्रसादतो नयन-बाण-रस-चन्द्रे (१६५२)।
प्रमिते वर्षे रचिता वृत्तिरियं कनककुशलेन ॥४॥
प्रत्यक्षरं गणनया वृत्तौ संख्या चतुःशती ।
सप्तपञ्चाशता श्लोकैरधिका समजायत ॥५॥
अङ्कतो ४५७, ससूत्र-वृत्तौ ग्रन्थाग्रम् ५०१ ॥
इति चतुर्विंशतिजिनस्तोत्रवृत्तिः संपूर्णा ॥

[187]

अन्तः—इति शम्बसाधुविरचितायां जिनशतकपञ्जिकायां वाग्वर्णनो नाम चतुर्थः परिच्छेदः समाप्तः ॥

जम्बूनामगुरुर्गुरूत्तमगुणोऽभूच्चन्द्रगच्छान्वयः
विद्वत्संसदि लब्धगौरवपदः साधुक्रियासूद्यतः ।
किं वा तस्य निगद्यते मतिगुणो तस्येदृशी निर्गता
सुश्लिष्टा पदसंधिभिः सुघटितैः स्पष्टाक्षराली मुखात् ॥१॥
तत्कृतस्यास्य ग्रन्थस्य गम्भीरार्थस्य मन्दधीः ।
मादृशः कुरुते वृत्तिं किमस्मादस्ति दुष्करम् ॥२॥

ततश्च—ख्यातो भट्टिकदेशसंधिषु सदा श्रीपार्श्वनागाभिधः
श्राद्धस्तस्य सुतोऽत्रः मल्हन इति ख्यातिं गतः सर्वतः।
तत्पुत्रेण च दुर्गकेण सुधिया प्रोत्साहितेनादरात्
श्रीनागेन्द्रकुलोद्भवेन मुनिना शम्बेन वृत्तिः कृता ॥३॥
शरदा पञ्चविंशे शतदशके स्वातिभे च रविवारे।
विवरणमिदं समाप्तं वैशाखसितत्रयोदश्याम् ॥४॥
इति संख्या ग्रन्थस्य, ग्रन्थाग्रम् १५०७। इति भद्रं भूयात्।

[191]

अन्तः—नागपुरीयतपोगणराजा श्रीचन्द्रकीर्तिसूरिवराः।
तच्छिष्यहर्षकीर्तिसूरिरकार्षीदिमां टीकाम् ॥१॥
विरचितमङ्गलपङ्क्तेर्जाग्रच्छक्तेः प्रदत्तसंवित्तेः।
शान्तिजिनस्तु प्रसत्तेर्वृत्तिर्विहिता बृहच्छान्तेः ॥२॥
इति श्रीबृहच्छान्तिटीका समाप्ता ॥ मिति मृगसरवद १४ दिने ॥

[246]

अन्तः—इति नवमः काव्यार्थः संपूर्णः, तद्वृत्तौ च सिद्धा श्रीस्तोत्रावचूर्णिः।
श्रीविजयप्रभसूरेः साम्राज्ये जयति तपगणे द्युमणेः।
कविरविकृपादिविजयः शिष्यो मेघोऽलिखद् वृत्तिम् ॥१॥
अनवगमादिह किञ्चिद् विवृतं शास्त्राद् विरुद्धमौत्सुक्यात्।
तत् सद्भिः संशोध्यं कषपट्टैर्विमलसद्हेम्नः ॥२॥

संवत् १७२४ वर्षे आश्विनसित ५ इति कर्मवाटयां लिखिता जिनविजयगणिना श्रीवल्लभपुरे।

[250]

वृ०अन्तः—यद्व्याख्यातेन मया पुण्यं निर्वाणसाधकं लब्धम्।
तेन जनः सर्वोऽपि जायेत जिनस्तुतौ निरतः ॥१॥
श्रीधनपालस्य कृतिर्गणिना विवृतेन हेम(? नेमि)चन्द्रेण।
कर्मक्षयस्य हेतोर्बोधिनिमित्तं च भव्यानाम् ॥
श्रीऋषभपञ्चाशिकावृत्तिः समाप्ता ॥

साहश्रीपूना भार्या श्रीगोरदे—तत्पुत्रसाहसहस्रकिरणभण्डारे इदं पुस्तकं गृहीत्वा पुत्रवर्धमान—शान्तिदासयुग्मपरिपालनार्थम् ॥

[332]

अन्तः—श्रीमत्तपगणगगनाङ्गणभासनतरुणतरणिनिभः ।
श्रीराजविजयसूरिर्बभूव भुवि भूरिवितानयशाः ॥१॥
योऽत्याक्षीद् विभवं घनं सुविहितानुष्ठानबद्धादरो
लोकं कोकमिव प्रबोधमनयद् गोभिश्च गोस्वामिवत् ।
छित्वा चोत्कटदर्पमुज्ज्वलपटांश्चक्रे विशेषोज्ज्वलान्
यो वाचालितमालवेश्वरसितच्छत्रप्रभावोज्ज्वलः ॥२॥
रत्नत्रयप्रथितसंयमभृत् तदीयपट्टे च रत्नविजयाह्वयसूरिरासीत् ।
येन प्रशान्तरजसा प्रशमार्णवेन रत्नाकरायितमनल्पगुणौघरत्नैः ॥३॥
तस्यान्वये निखिलभूतलगीतकीर्तिः श्रीहीररत्न इति सूरिवरो विरेजे ।
स्वर्गं ततोऽप्यखिलभक्तसमीहितानि योऽद्यापि पूरयति नव्य इवामरद्रुः ॥४॥
तत्पट्टभूषणमणिर्जयरत्नसूरिः सर्वाग्रणीर्गुणिषु भूरिगुणाश्रयोऽभूत् ।
श्रीभावरत्न इति भावविदां वरेण्यस्तत्पट्टभृज्जयति संप्रति सूरिराजः॥५॥
श्रीहीरत्नसूरेर्मुख्याः शिष्याः सुनिर्मलाभिख्याः ।
श्रीलब्धिरत्नविबुधाः शास्त्रार्णवपारदृश्वानः ॥६॥
श्रीसिद्धिरत्ननाम्ना पाठकवर्यास्तदन्वये तदनु ।
श्रीहर्षरत्नवाचकवरा वरीयोगुणैर्वन्द्याः ॥७॥
लक्ष्मीरत्नगणीशा आसन् दुर्वादिदनुजलक्ष्मीशाः ।
श्रीज्ञानरत्नगणयस्तदाश्रयाः सांप्रतं जयन्तु चिरम् ॥८॥
तच्चरणकमलसेवाभृङ्गस्तत्सङ्गसमयतरङ्गः ।
सुविहितकल्याणविमलगणिवरविहितार्थतानुन्नः ॥९॥
बालावबोधवार्तामध्यात्मसुरद्रुमाख्यशास्त्रस्य ।
मुनिहंसरत्न एतामतनोत् तनुबुद्धिसत्त्वहिताम् ॥१०॥
शोध्यः सुतत्त्वविद्भिर्ग्रन्थोऽयं धीधनैः प्रवाच्यमानश्च ।
सद्भावसंपदाढ्यैराचन्द्रार्कं चिरं जयतात् ॥१२॥

इति श्रीअध्यात्मकल्पद्रुमबालावबोधः संपूर्णः ।

[343]

पू०अन्तः—श्रीखरतरगणनायकजिनहंसयतीश्वरा भुवि बभूवुः ।
श्रीपुण्यसागरमहोपाध्यायास्तद्विनेयवराः ॥१॥

विजयन्ते तच्छिष्या वाचकवरपद्मराजगणिमणयः ।
तेषामन्तेवासी विनिर्ममे ज्ञानतिलकगणिः ॥२॥
गौतमकुलकसुवृत्तिं विलोक्य शास्त्राणि वाक्पतिकायः ।
वर्षे व्योम-भवानीसुतास्य—लेश्या-शशाङ्कमिते (१६६०) ॥३॥
दीपोत्सवपर्वदिने विजयिनि जिनचन्द्रयुगवरे जयति ।
यदशुद्धं तच्छोध्यं प्रसद्यमधोऽत्र धीमद्भिः ॥४॥
एकोनसप्ततिकथासमुदायसमन्विता सुगमबोधा ।
विज्ञजनवाच्यमाना वृत्तिरियं भुवि चिरं जीयात् ॥५॥
इति श्रीगौतमकुलकवृत्तिः समाप्ता ॥

[344]

अन्तः—जातः श्रीसकलादिकीर्तिमुनयः श्रीमूलसंघेऽग्रणी—
स्तत्पट्टोदयपर्वते रविरभूद् भव्याम्बुजानन्दकृत् ।
विख्यातो भुवनादिकीर्तिरथ यस्तत्पादकञ्जे रज—
स्तत्त्वज्ञानतरङ्गिणी स कृतवानेतां हि विद्भूषणः ॥२०॥
क्रीडन्ति ये प्रविश्येमां तत्त्वज्ञानतरङ्गिणीम् ।
ते स्वर्गादिसुखं प्राप्य सिद्ध्यन्ति तदनन्तरम् ॥२१॥
यदैव विक्रमातीताः शतपञ्चदशाधिकाः ।
षष्टिः (१५६०) संवत्सरा जातास्तदेयं निर्मिता कृतिः ॥२२॥
ग्रन्थसंख्याऽत्र विज्ञेया लेखकैः पाठकैः किल ।
षट्त्रिंशदधिका पञ्चशती श्रोतृजनैरपि ॥२३॥
इति मुमुक्षुभट्टारकश्रीज्ञानभूषणविरचितायां ज्ञानतत्त्वतरङ्गिण्यां शुद्ध-
चिद्रूपप्राप्तिक्रमप्रतिपादकोऽष्टादशोऽध्यायः ॥

ग्रन्थसंख्या ५५५ । नवानगरमध्ये लिखितं व्यास लीलाधर भीमजी औदिच्यब्राह्मणेन ॥ संवत् १९५४ ना शाके १८१९ प्रवर्त्ते[माने] आषाढ शुदि १३ श्रीसोमवारे, श्रीकल्याणं भूयात् ॥

[349]

अन्तः—नानाधर्मरतैर्विवेकविशदैर्भव्याङ्गिभिः संकुलं
श्रीप्रह्लादनपार्श्वनाथविमलागारेण संशोभितम् ।
अस्ति स्वर्गविजित्वरं पुरवरं प्रह्लादनं पावनं
मन्ये चास्य हि लज्जया सुरपुरं नायाति दृग्गोचरम् ॥१॥

विशालेऽस्ति पुरे तस्मिन्नोशवंशोऽतिविश्रुतः ।
तस्मिन् वंशे पुरा ह्यासीत् पारेखान्वयभूषणः ॥२॥
रामचन्द्रो धनो धर्मी कार्याकार्यविवेकभृत् ।
अस्ति चीमनलालाह्वस्तदङ्गजपवित्रधीः ॥२॥
परसनेति नाम्नाऽभूत् तद्भार्या धर्मनिश्चला ।
तेनायं लेखयांचक्रे स्वपत्नीपुण्यवृद्धये ॥४॥
स्वच्छे बृहत्तपोगच्छे विजयानन्दसूरयः ।
प्रसिद्धा भुवनेऽभुवन् शिष्यौघसेवितक्रमाः ॥५॥
तेषां पट्टे किलेदानीं वर्तन्ते गच्छनायकाः ।
विजयकमलाचार्याः शीलालङ्कृतविग्रहाः ॥६॥
द्वि-रसाङ्क-भूमितेऽब्दे श्रावणमासेऽसितदले रम्ये ।
भूपतिशेरमहम्मदखानेत्याख्यस्य शुभराज्ये ॥७॥
विजयानन्दसूरीणां विनयिविनेयस्य नित्यपठनकृते ।
ग्रन्थोऽयं तेन मुदा समर्पितः कान्तिविजयस्य ॥८॥

लि० भावसार प्राणजीवन ईश्वरदास, मु. बोरसद, संवत् १९६४ ना वर्षे चैत्रमासे शुक्लपक्षे तिथौ अष्टमी ने गुरुवारे समाप्तः ॥ शुभं भवतु ॥

[365]

बृ० आदिः—ज्योतिः परं योगिभिरप्यगम्यं परानपेक्षं भुवनप्रकाशि ।
यदिन्द्रियाणां विषयव्यतीतं सदा चिदानन्दमहं महेयम् ॥१॥
जगत्प्रदीपस्य वृषध्वजस्य तमोपहाः पान्तु तनुत्विषो वः ।
जटामिषाद् यस्य शिरःप्रदेशे विलोक्यते कज्जलमालिकेव ॥२॥
कथमपि ललनानां रागिणीनां न रागः
सकलरजनिमन्तस्तापितेऽपि प्रकामम् ।
लगति मनसि वस्त्रे निःकषाये स्मरस्य
दिशतु भविकलोके सश्रियं वर्धमानम् ॥३॥
नरा महावीरमुपासते ये सदैव ते ब्रह्म पराप्नुवन्ति ।
इत्यस्य बाह्यं परिहृत्य मुख्यमर्थं भजन्तं नमतेन्द्रभूतिम् ॥४॥
प्रसूनवद् यस्य निदेशलेशं शिरःसु दध्रे सुमनःसमूहम् ।
स वः श्रियं श्रीगणभृत् सुधर्मा क्रियात् सुधर्माधिपतेः सधर्मा ॥५॥

सरस्वतीलब्धवरप्रसादा जयन्ति संघप्रभसूरिपादाः ।
शिरस्तलन्यस्तकराब्जयोगाल्लघुर्यदीयो गुरुतामुपैति ॥६॥
सतां मते कोऽपि कविप्रबन्धे गुणं समारोपयितुं प्रयत्नः ।
पयोदमुक्तानि पयांसि मुक्ताः करोति शुक्तिर्हि समुद्रजाता ॥७॥
दहन् सुवर्णं परिवर्त्य काव्यं खलः कलादः खलु नापकारी ।
सतां स्फुटालङ्करणं यतोऽयमहार्यरूपं तदिदं तनोति ॥८॥
पौरस्त्यसैद्धान्तिकमार्गगत्वान्ममापि मान्यं कृतिभिः कवित्वम् ।
मणीगणश्रेणिगतो जनानां किमश्मखण्डोऽपि न मण्डनाय ? ॥९॥

इह हि सांकाश्यवंशरसोद्भवायमानः संविग्नागमचक्रवर्तिश्रीमद्वर्धमानसूरिपदपद्मप्रसादप्रभावप्राप्तपुण्याख्याक्षयनिधीश्वरायमाणः सरस्वतीकण्ठाभरणादिचतुरुत्तरविंशदशत(१०४)शालिना श्रीप्रमारराजश्रीभोजराजभूजानिना प्रदत्तकविराज इत्यपरनामा धनपालश्रीपण्डितः कदाचिच्चित्तश्रावकैरुपरुध्याहोरात्रिकं श्रावकविधिं पृष्टः स्पष्टगाथाभिस्तमाचिख्यासुः श्रावकविध्यभिधानं प्रकरणं चकार, तस्य च प्रसन्नगम्भीरपदभावस्येदानींतनकालीनाबुधजनप्रतिबोधनाय विवरणमुपक्रमते ।

अन्तः—इत्याचार्यश्रीसंघप्रभसूरिशिष्यपण्डितश्रीधर्मचन्द्रविरचितायां श्रावकविधिप्रकरणवृत्तौ कल्याणाङ्कायां सरात्रिकप्रकीर्णकाधिकारो द्वितीयः समाप्तः । समाप्ता चेयं श्रावकविधिप्रकरणवृत्तिः ॥ ग्रं० ४४५०॥

ऊकेशान्वयमण्डनं गुणनिधिमाल्हाभिधानः सुधी—
स्तस्यास्ते तनया विनीतविनया मन्दोदरी विश्रुता ।
श्रीमच्छ्राद्धविधेः कृतं विवरणं धर्मेन्दुना सादरं
स्वद्रव्यव्ययनादलेखयदसौ मूलप्रतौ सांप्रतम् ॥१॥
तुर्यर्त्वब्धीन्दु(१७६४)मिते वर्षे माघे वलक्षपक्षेऽथ ।
भद्रातिथौ सुधाभुग् गुरुघस्रे पौष्ण्यमेति शुभे ॥२॥
श्रीमद्जयसुरभूभृद्दुर्गे रिपुभूपवाहिनीदुर्गे ।
गुरुपूर्णचन्द्रशिष्यो व्यलिखदिदं हेमसाराहः ॥३॥
यावच्चन्द्रदिनेश्वरजिनशासनमेरुनीरनिधिमुख्याः ।
विजयन्ते भुवि तावन्नन्द्यात् पुस्तकमिदं भद्रम् ॥४॥
अक्षरमात्रापदस्वरहीनं व्यञ्जनसन्धिविवर्जितरेफम् ।
साधुभिरत्र मम क्षमितव्यं कोऽत्र न मुह्यति शास्त्रसमुद्रे ॥५॥

[413]

अन्तः—तपगच्छजलधिचन्द्राः स्वाध्यायध्यानकरणनिस्तन्द्राः ।
भव्यजनानन्दकराः श्रीविजयानन्दसूरयोऽभूवन् ॥१॥
तत्पट्टोदयभूधरतरणिसमाने तमस्तमोऽपहरे ।
श्रीविजयराजसुगुरौ सूरिणाऽलंकृते विजयमाने ॥२॥
तत्सत्सतीर्थविबुधप्रख्यानां शान्तिविजयगणिनाम्नाम् ।
भवभावनासु वार्तिकमलेखि शिशुना सुमानविजयेन ॥३॥
प्रत्यक्षरं गणनया ग्रन्थमानं विनिश्चितम् ।
अनुष्टुभां सपादानि चतुस्त्रिंशच्छतानि च ॥४॥
ग्रन्थाग्रम् ३४२५ । इति भवभावनाग्रन्थः समाप्तः ।

संवत् १९६४ ना मिति चेत्र सुद ११ दिने लिपीकृतं जोसी सिरीनाथ नागोरमध्ये ॥

[429]

आदिः—यस्योपदेशसमये दशनांशुमिश्रा स्कन्धोपरिप्रसृमराश्विकुरप्ररोहाः ।
कल्याणपात्रदधिसंवलितोरुदूर्वा लीलां दधुः स कुशलाय युगादिदेवः ॥१॥
श्रिये स शान्तिर्मृगलाञ्छनः सन् युक्तं दधानः कुमुदां विकाशम् ।
याऽभूद् भवानीहितभावमाप्य शिवोत्तमाङ्गस्थिरभासुरश्रीः ॥२॥
शिवश्रियो रूपमनन्यरूपं ज्ञानात्मदर्शे परिभाव्य जज्ञे ।
आशैशवात् तन्मयमानसो यः स नेमिनाथः शिवतातिरस्तु ॥३॥
भावा अनेके प्रतिबिम्ब्य यस्य ज्ञाने विबाधा दधिरे निवासम् ।
फणानिभात् स पूनयाश्च (?) तस्थुस्त्यक्त्वा रिपुत्वं स शिवाय पार्श्वः ॥४॥
यस्मिन् जिने गर्भगतेऽपि पित्रोः श्रीः सर्वतोऽजायत वर्धमाना ।
सिद्धार्थसूनुश्चरमप्रभुर्मां सिद्धार्थसार्थसदृशं विदध्यात् ॥५॥
जयन्तु ते श्रीगुरवः कलावतां जडोऽपि येषां करसंगमान्नरः ।
रत्नेषु चन्द्रोपलवद् धुरि स्थितं समश्नुते नाशितदोषदुर्दशः ॥६॥
चक्रे पुरा यज्जयसिंहसूरिशिष्येण शास्त्रं जयकीर्तिनाम्ना ।
तस्याहमासूत्रयिताऽस्मि वृत्तिं सुखावबोधां स्व-परोपकृत्यै ॥७॥

इह हि प्रकरणकारः प्रगुणिततत्त्वोपदेशसुधासारः पुण्यवल्लरीपल्लवोल्लासवर्षारम्भे श्रीश्रीलोपदेशमालाख्यप्रकरणप्रारम्भे सारेतरविचारणप्रवणचतुरचेतश्चमत्कृतये प्रेक्षावत्-

प्रवृत्तये विघ्नविनायकोपशमाय च समुचितेष्टदेवतानमस्कारपूर्वकमभिधेयप्रयोजनसम्बन्ध-बन्धुरां प्रथमगाथामाह—

अन्तः—इति श्रीशीलोपदेशमालावृत्तौ श्रीसंघतिलकसूरेः शिष्यविद्यातिलक-विरचितायां धनश्रीमहासतीकथा [समाप्ता]।

इति समाप्तं शीलोपदेशमालाख्यं प्रकरणं च, तत्समाप्तौ च संपूर्णेयं शीलतर-ङ्गिणीनाम श्रीशीलोपदेशमालावृत्तिरिति समाप्ता ॥

[431]

वृत्ति—अन्तः—आसीत् कृष्णमहर्षिगच्छगगनप्रोद्यद्दिवाधीश्वरः
सूरिः श्रीकमलादिचन्द्रसुगुरुश्चारित्रलक्ष्मीधरः।
तच्छिष्यो गणिपुण्यकीर्तिरमलां हर्षप्रकर्षादिमां
टीकां सद्गुणकीर्तिभिस्त्रिभुवनव्यापीं शुभामभ्यधात् ॥१॥
यद्यप्यत्र महाकवीन्द्ररचिता विद्वच्चमत्कारिका
विद्यन्तेऽपि सविस्तरा [च विविधाः] टीका मनोज्ञाः पुरा।
नानार्थेऽपि तथापि मन्दमतिना शीलोपदेशाश्रयाः
टीकावर्तिरिवोदिता गुणवती रम्या बुधोद्बोधिनी ॥२॥
यावत् श्रीजिनराजधर्ममहिमा विश्वेषु यावन्नभो
यावद् वारिधरास्तथा श्रुतधरा यावद्धरा भूधराः।
यावच्चन्द्र-दिवाकरौ रुचिकरौ सद्बुद्धिद्रव्यैरियं
तावन्नन्दतु पुण्यकीर्तिजनिता विस्तार्यमाणा बुधैः ॥३॥

इति श्रीकृष्णर्षिगणनभोऽङ्गणदिनमणीनां पूज्यश्रीकमलचन्द्रसूरीणां शिष्यपण्डित-पुण्यकीर्तिविरचिता शीलोपदेशमाला-टीका संपूर्णा ॥

[460]

अन्तः—इति ज्ञानार्णवे योगप्रदीपाधिकारे आचार्यश्रीशुभचन्द्रदेवविरचिते मोक्षप्रकरणं समाप्तमिति। संधि ४२॥ इति ज्ञानार्णवः समाप्तः ॥

अथ श्रीमूलसंघे बलात्कारगणे सरस्वतीगच्छे श्रीकुन्दकुन्दाचार्यान्वये भट्टारक-श्रीपद्मनन्दिदेवास्तत्पट्टे भट्टारकश्रीपरमनैर्ग्रन्थभट्टारकश्रीशुभचन्द्रदेवास्तत्पट्टे जितेन्द्रियः भट्टारकश्रीजिनचन्द्रदेवस्तत्पट्टे सकलविद्यानिधानयम-नियम-स्वाध्याय-ध्यानतत्पर-सकलमुनिजनमध्यलब्धप्रतिष्ठो भट्टारकश्रीप्रभादेवः आवैरिगढस्थानात् कूरमवंशे महाराजाधिराजप्रिथी(पृथ्वी)राजराज्ये षण्डेलान्वये समस्तगोष्ठिपञ्चायतशास्त्रं

ज्ञानार्णवं लिखापितम् । त्रपनक्रियावर्तनिवंतवाहनाद्रयोगुघटापितं कर्म्मक्षय-निवर्तं (?) ॥७॥

संवत् १९५८ ना वर्षे पौषमासे शुक्लपक्षे तिथौ द्वादशमी ने भौमवासरे संपूर्ण लखेल छे । गांम बीजापुरमध्ये पार्श्वनाथप्रसादेन लहिया प्रह्लाद मोहन-लाले मुनिमहाराजकेशरविजयस्वपठनार्थं गाम कलोलवाला बारोटें लखेल छे ॥

[473]

अन्तः—इति श्रीयोगशास्त्रस्यान्तरश्लोकाः समाप्ताः ॥ संवत् कुसुमायुधा-युध-कैलाशभूधरशिरस्तटीकान्तभूषन—गगनाङ्गणतिलकवाहन-रजनीभूषणप्रमिते वर्षे हृष्यवैदुष्यसाक्षिणि विचक्षणमुख्यमाननीये तैष्ये मासि बलक्षविपक्षपक्षे पञ्चम्यां कर्म-वाटयां बुधजनमनोज्ञज्ञवासरे, अकर्कशपरिणतिस्वामिनि कर्कलग्ने तस्मिन्नेव च नन्दांशस्वामिनि लिखितमिदं प्रशस्तं पुस्तकम् ।

विपुलहृदयाभिगम्ये खिद्यति काव्ये जडो न मौर्ख्ये स्वे ।
निन्दति कञ्चुकिकारं प्रायः शुष्कस्तनी नारी ॥ इति दिक् ॥

[495]

अन्तः—इति श्रीक्षेत्रसमासबालावबोधः संपूर्णः । संवत् १८७९ वर्षे मिति मिगसर सुदि १५ दिने । श्री बृहत्वरगणपति श्रीजिनहर्षसूरिजीविजयछत्रे एतत् बृहत्खरतरगणे श्रीजिनकुशलसूरिशाखायां क्षेमधाटीयवणारसजी श्रीश्रीजीवणदासजी-गणि—तत्शिष्यवणारसयुक्तिधीरजीगणि—तल्लघुभ्रातृवणारसजयसागरजी—तद्बृहत्शिष्य-वणारस अमरसिन्धुरगणि लिपीचक्रे, श्रीमुंबईबिन्दरे, द्वितीयचतुर्मासीकृत भ्रातृ पं० प्रगुणसिन्धुर राजगडे, भ्रातृपं० प्र० महिमारत्न नाथूसरग्रामे, चतुर्मासी मरुस्थलदेशे, भ्रातृ पं० प्र० कनकरत्न हैदराबादे चतुर्मासी स्थित अहं पं० प्रशिष्य रूपचन्दयुतः परमानन्दे चतुर्मासी कृतः, सुश्रावक महतीयांणगोत्री साहजी श्रीसाराचन्दजी तत्पुत्रसाहसोमजी तत्पुत्रधर्ममूर्ति धर्मसभाशृङ्गार साहजी श्रीपुरुषोत्तम-जीवाचनार्थं लिखितमिदं पुस्तकम्, भ्रातृचापसी, कुवरजी रूपचन्द भ्रातृद्वयकृ-मोक्षेय(कर्मक्षयनिमित्तं) स च दीर्घायुः चिरं जीवेत्याशीर्वादं ददुः ॥

[502]

अन्तः—स्फूर्जद्गुणप्रकरवासितविष्टपानां श्रीदेवसुन्दरमहत्तमसूरिराजाम् ।
शिष्योऽवचूर्णिमकरोद् गुणरत्नसूरिः संस्कारबोधविधये स्व-परार्थमेताम् ॥१॥

श्रीबृहत्क्षेत्रसमाससत्के लघुवृत्ति-महद्वृत्तीर्विलोक्य भट्टारकप्रभुश्रीज्ञानसागरसूरि-पादकृतावचूरिश्च विरचितेयम् । इति सोमतिलकसूरि.....।

[537]

अन्तः—इत्यागमिकवस्तुविचारसारप्रकरणवृत्तिः समाप्ता ॥

प्रायोऽन्यशास्त्रदृष्टः सर्वोऽप्यर्थो मयाऽत्र संरचितः ।
न पुनः स्वमनीषिकया तथापि यत् किञ्चिदिह वितथम् ॥१॥
सूत्रमलङ्घ्यलिखितं तच्छोध्यं मय्यनुग्रहं कृत्वा ।
परकीयदोष-गुणयोस्त्यागोपादानविधिकुशलैः ॥२॥
छद्मस्थस्य हि बुद्धिः स्खलति न कस्येह कर्मवशगस्य ।
सद्बुद्धिविरहितानां विशेषतो मद्विधासुमताम् ॥३॥
कृत्वा यद्वृत्तिमिमां पुण्यं समुपार्जितं मया तेन ।
मुक्तिमचिरेण लभतां क्षपितरजाः सर्वभव्यजनः ॥४॥
मध्यस्थभावादचलप्रतिष्ठः सुवर्णरूपः सुमनोनिवासः ।
अस्मिन् महामेरुरिवास्ति लोके श्रीमान् बृहद्गच्छ इति प्रसिद्धः ॥५॥
तस्मिन्नभूदायतबाहुशाखः कल्पद्रुमाभः प्रभुमानदेवः ।
यदीयवाचो विबुधैः सुबोधाः कर्णेकृता नूतनमञ्जरीवत् ॥६॥
तस्मादुपाध्याय इहाजनिष्ट श्रीमान् मनस्वी जिनदेवनामा ।
गुरुक्रमाराधयिताऽल्पबुद्धिस्तस्यास्ति शिष्यो हरिचन्द्रसूरिः ॥७॥
अणहिल्लपाटकपुरे श्रीमज्जयसिंहदेवनृपराज्ये ।
आसापूरवसत्यां वृत्तिस्तेनेयमारचिता ॥८॥
एकैकाक्षरगणनादस्या वृत्तेरनुष्टुभां मानम् ।
अष्टौ शतानि जातं पञ्चाशत्समधिकानीति ॥९॥
वर्षशतैकादशके द्वासप्तत्याधिके नभोमासे ।
सितपञ्चम्यां सूर्ये समर्थिता वृत्तिकेयमिति ॥१०॥ यन्नाम्नि० ॥

मुम्बापुरीवास्तव्यसुश्रावकरत्नटोकरशी शामजीनामधेय-सुपत्नी श्राविकारत्नदेवकीनामधेयेन स्वश्रेयसे इदं पुस्तकं मुनिवर्यपंन्यासपदधारककेशरविजयाह्वयपूज्यपादानां पठनार्थं समर्पितम् ॥ संवत् १९६४ आश्विनसुदि १४ गुरुवासरे पालीताणामध्ये

[583]

अन्तः—गच्छे श्रीकोटिकाख्ये विशदखरतरे ज्ञानपात्रा महान्तः
सूरिश्रीजैनचन्द्रा गुरुतरगणभृच्छिष्यमुख्या विनीताः ।
श्रीमत्पुण्यात् प्रधाना सुमतिजलनिधिपाठकाः साधुरङ्गाः
तच्छिष्याः पाठकेन्द्राः श्रुतरसरसिका राजसारा मुनीन्द्राः ॥

तच्चरणाम्बुसेवालीनाः श्रीज्ञानधर्मधराः ।
तच्छिष्यपाठकोत्तंसदीपचन्द्राः श्रुतरसज्ञाः ॥२॥
नयचक्रलेशमेतत् तेषां शिष्येण देवचन्द्रेण ।
स्व-परावबोधनार्थं कृतं सदभ्यासवृद्ध्यर्थम् ॥३॥
शोधयन्तु सुधियः कृपापराः सत्त्वतत्त्वरसिकाश्च पठन्तु ।
साधनेन कृतसिद्धिसत्सुखाः परममङ्गलभावमश्नुवते ॥४॥
इति श्रीनयचक्रविवरणं समाप्तं, श्लोकसंख्या ४००।

[601]

अन्तः—गच्छे श्रीमत्तपाख्येऽजनि रजनीकरस्पर्द्धिविस्फारकीर्त्तिः
श्रीमानानन्दमेरुस्त्रिभुवनजनतानन्दनातन्द्रचन्द्रः ।
तच्छिष्यः पद्ममेरुः श्रुतसलिलनिधिः पारदृश्वा मितद्रुः
श्रौत-स्मार्त्तागमानामसकलसकलब्रह्मवेदी विनेयः ॥१
स तस्य पद्मसुन्दरः प्रमाणसुन्दरं व्यधात् ।
प्रमाणयन्तु कोविदाः प्रामाणिकामिमां गिरम् ॥२॥
कराग्नि-जलधीन्दुके (१७३२) नृपतिविक्रमादित्यतो
जगज्जनकृतोत्सवे प्रवरमाघमासे सिते ।
प्रमाणनयसुन्दरं जिनमताश्रितानन्दनं
समर्थमुनिभिर्वरं लिखितमाशु हर्षप्रदम् ॥३॥
सर्वज्ञोदितहेतुयुक्तिनिकरैः स्याद्वादमुद्राङ्कितै—
र्जाग्रन्मोहमहाभरैकविलसन्मिथ्यादृशां यन्मतम् ।
तच्चानेकमहत्कदाग्रहजुषामेकान्तवादात्मकं
तूर्णं जीर्णपटीतटीव शतधा संभिद्यते तत्क्षणात् ॥४॥ यन्नाम्नि० ॥

इति प्रमाणसुन्दरग्रन्थः समाप्तः । संवत् १९६५ सावण सुदि ११ ॥

इति श्रीप्रमाणसुन्दरग्रन्थः समाप्तः । संवत् १९६५ श्रावणवदि ७ लिपिकृतं ग० व्यास कस्तुरचन्द नगरपालीताणामध्ये ॥

[608]

अन्तः—इति श्रीसाधुपूर्णिमागच्छीयश्रीमदाचार्यगुणचन्द्रसूरिशिष्यपं० ज्ञानचन्द्रविरचिते रत्नाकरावतारिकाटिप्पनेऽष्टमः परिच्छेदः । सर्वग्रन्थाग्रन्थ २१०४॥

दुष्टव्यन्तरवादीन्द्रसर्प्पदर्प्पाम्बुजाम्बुदः ।
जीयाद् विजयसिंहः श्रीसाधुराकाविधुर्गुरुः ॥१॥

तमोध्वंसितपस्तेजोविमलीकृतभूतलः ।
अभूद्भयदेवाख्यः सूरिस्तत्पट्टमण्डनम् ॥२॥
श्रीचन्द्रसूरिर्भवमोहमूर्च्छाविध्वंसनोत्सिक्ततपःप्रभावः ।
साहित्यतर्कागमपारदृश्वा श्रीदेवसूरिः सुरसार्थनुत्यः ॥३॥
श्रीसाधुपूर्णिमागच्छश्रीभालतिलकप्रभः ।
बुद्ध्या जितमरुत्सूरिः सूरिश्रीतिलकप्रभः ॥४॥
कवित्वे रसनिःष्यन्दे कविनाऽप्यजितप्रभः ।
प्रमाणागमनिष्णातस्ततोऽभूद्जितप्रभः ॥५॥
जीयात् ततः श्रीकनकप्रभाख्यः सूरिः सदा सद्गुणबद्धलक्षः ।
मारान्तकृत्प्रोज्ज्वलशीलभल्लः कृपाकृपाणीहतकोपमल्लः ॥६॥
तद्ध्यानलीनोऽस्तु गुणैरहीनोऽशोभि सूरिः श्रीगुणचन्द्रसूरिः ।
जयाङ्कराजी बहुभव्यराजीपयोजहेलिः श्रितधर्मकेलिः ॥७॥
रत्नाकरावतारिकवरटिप्पनं तद् ज्ञानेन्दुरल्पतरधीः स्वमतिप्रवृद्ध्यै ।
तच्छिष्यको रचितवान् मलधारिपूज्यः श्रीराजशेखरगुरोश्च निदेशमाप्य ॥८॥
श्रीराजशेखरगुरुर्गरिमाविधानं तर्काम्बुधि[र्यश्च]महार्घजलाभिलाषी ।
मद्वाक्यजातमखिलं तदनल्पदोषे निर्दूषणं व्यधित सत्प्रतिभाऽमितश्रीः ॥९॥
यद्यपि किञ्चिन्न्यूनं ज्ञानाभावान्मया भवति रचितम् ।
तच्छोध्यं विबुधजनैर्मयि कुर्वाणैः कृपामुच्चैः ॥१०॥

इति श्रीरत्नाकरावतारिकाटिप्पनं संपूर्णं समाप्तम् ।

संवत् १९५७ आसोशुद्धिपूर्णिमादिने रविवासरे लिखितं जैनशालामध्ये बारोट हरिलाल मालजीपठनार्थं मुनिकेशरविजेजी ॥

[623]

अन्तः—स्याद्वादपुष्पकलिकां प्रवचनाद् विनिर्ममे ।
बालबोधाय लेशेन नत्वाऽर्थावगमाय च ॥१॥
कोटिकेन्दुखरतरे वंशवाचकभास्करः ।
निध्युपाध्यायवैनेयश्चक्रे वाचकसंयमः ॥२॥
वत्सराब्धीन्दुखेटेन्दु(१९१४)धर्मजन्मसुवासरे ।
सुश्रेयावासलाभाय स्वेप्सिताय व्यरच्यत ॥३॥

संवत् १९६३ अधिकचैत्रशुक्ल ९ चन्द्रवासरे, लि० ऋ० मनसा ऋषिः पादलिप्तपुरे ॥

[629]

अन्तः—श्रीमत्तपोगणनभोऽङ्गणभासनैकभानूपमाः परमतापिमहःसमूहाः ।
शश्वन्नभोगरुचयः शुचयस्तपोभिः श्रीसोमसुन्दरगुरुप्रवरा बभूवुः ॥३०॥
तेषां संततिगणपतिलक्ष्मीलीलाविलासगोविन्दाः ।
श्रीमल्लक्ष्मीसागरगुरवो गोपीवरा रेजुः ॥३१॥
यत्कृष्णवर्त्मा व्यभिचारिधूमानुमानसम्यक् समुदीरितं तत् ।
अकृष्णवर्त्माऽपि विशिष्टधूमोज्ज्वलच्छविर्यद् यशसां समूहः ॥३२॥
तत्पट्टोदयभूधरसहस्रकरसोदरा युगप्रवराः ।
श्रीसुमतिसाधुसूरीश्वरा जयन्त्यसमतममहसः ॥३३॥
हृत्कुण्डान्तरमण्डितोज्ज्वलतरध्यानाग्निना यैः स्फुरत्—
कामः श्यामतनुर्व्यधायि सहसा नष्टोऽथ दुष्टोऽसकौ ।
तापाक्रान्ततनुः सुधामयतनुं शिश्राय शीतद्युतिं
तस्मिन् श्यामललाञ्छनच्छविमिषादद्याप्ययं वीक्ष्यते ॥३४॥
तेषां श्रीगणराज्ये विद्यागुणगौतमानुकारकृताम् ।
श्रीजिनहर्षगुरूणां शिष्यशिशुः साधुविजययतिः ॥३५॥
प्राथमिक-प्रमाणिकपठनायालिखद् यथावगमम् ।
प्रकरणमिदं सुधीभिः संशोध्यं मयि कृपां कृत्वा ॥३६॥ युग्मम् ॥
यः पठति वादिविजयप्रकरणमिदमादितोऽपि कौतुकतः ।
अहमहमिकया मोदाद् वृणुते तं साधुविजयश्रीः ॥३७॥ यन्नाम्नि० ॥

इति श्रीवादिविजयप्रकरणं समाप्तम् । संवत् १९६४ ना वर्षे चैत्रमासे कृष्णपक्षे तिथौ द्वादशी ने सोमवारे संपूर्णम् ॥

[984]

अन्तः—तपगच्छगगनभासनभासुरतरचित्रभानुसंकाशाः ।
विजयानन्दमुनीन्द्रा आसन् गुणरत्नजलनिधयः ॥६॥
तच्छिष्यवर्गमुख्याः विबुधाः श्रीहंसविजयनामानः ।
तत्पदपङ्कजमधुपो विबुधो धीरादिविजयाह्वः ॥७॥
श्रीमौनैकादश्यां लिलेख माहात्म्यमतुलमोदभरात् ।
वेद-मुनि-बाह-शशधर(१७७४)वर्षे श्रीसूर्यपुरनगरे ॥८॥ युग्मम् ॥
श्रीविजयऋद्धिसूरेरादेशाद् विरचिता कथा मयका ।
यावद् व्योम्नि रवीन्दू तावन्नन्दतु चिरायैषा ॥९॥

इति श्रीमौनैकादशीचरित्रम् ॥

[988]

अन्तः—श्रीहीरविजयगुरुपट्टे श्रीविजयसेनसूरीन्द्राः ।
तेषां स्वच्छे गच्छे विबुधश्रीराजसागरकाः ॥१९८॥
तेषां शिष्यभुजिष्यो निजमत्यनुसारतश्च माहात्म्यम् ।
मौनस्यैकादश्यां चकार रविसागरो विबुधः ॥१९९॥
यत्राज्ञाहरपार्श्वो यत्र स्तूपश्च हीरविजयगुरोः ।
यस्योपान्ते द्वीपाभिधबन्दिरमस्ति स्वस्तिकरः ॥२००॥
उन्नतनगरे तस्मिन्नेतत् पूर्णीबभूव विद्वद्भिः ।
संशोध्य वाच्यमब्दे सागर-शर-रस-शशिप्रमिते (१६५४) ॥२०१॥
इति मौनैकादशीमाहात्म्यं संपूर्णम् ॥ सं०१८७२॥

स्त०अन्तः—संवत् १६५७ वरस्ये रच्यो ।
इति श्रीमौन इग्यारसना चरित्रनो टबो लिख्यो श्रीगुरुप्रसादे ॥

[992]

अन्तः—श्रीखरतरगच्छीयाः श्रीजिनराजसूरयः ।
तच्छिष्यो वाचनाचार्यः किञ्चिज्ज्ञो जयसागरः ॥१२॥
पर्वरत्नावलीं नाम्नीं कथामेनां संदब्धवान् ।
लब्धवानत्र यत्पुण्यं भूयात् तेन सुखी जनः ॥१३॥
इति मयाऽऽगमदोषविषोज्झिता श्रुतमहोदधिमध्यसमुद्धृता ।
रसविलासवती विहिता हिता शुचिकथा च सुधा च निपीयताम् ॥१४॥
अपि च दिग्गज-सप्त-चतुः-सितद्युतिमिते (१४७८) परितः परिवत्सरे ।
नगरपत्तनमिस (?) समर्चिता जयतु धर्मकथा जिनशासने ॥१५॥

इति श्रीनिजोपकारिगुरुराजपादोपजीविना वाचनाचार्यजयसागरगणिना पर्वरत्नावलीनामिकेयं कथा स्व-परहितार्थमारचिता सा वाच्यमाना चिरं नन्दतात् । ग्रं० ६७६॥

अन्तः—इति श्रीखरतरगच्छे श्रीजिनराजसूरिशिष्योपाध्यायश्रीजयसागरविरचिते श्रीपृथ्वीचन्द्रचरिते एकविंशभववर्णनो नाम एकादशः प्रस्तावः ॥

श्रीवीरशासनाम्भोधिसमुल्लासनशीतगोः ।
सूरेरभयदेवस्य नवाङ्गीवृत्तिवेधसः ॥१॥

पट्टालंकारसारश्रीः सूरिश्रीजिनवल्लभः ।
सन्ताने तस्य शिष्यात्मा श्रीविजयोदयसूरिराट् ॥२॥
तत्पट्टशार्ङ्गभृद्वक्षःस्थलकौस्तुभसंनिभः ।
श्रीजिनराजसूरीन्द्रो योऽभूद् दीक्षागुरुर्मम ॥३॥
तदनु श्रीजिनवर्द्धनसूरिः श्रीमानुदैदुदारमनाः ।
लक्षण-साहित्यादिग्रन्थेषु गुरुर्मम प्रथितः ॥४॥
श्रीजिनभद्रमुनीन्द्राः खरतरगणगगनपूर्णचन्द्रमसः ।
ते चोपाध्यायपदप्रदानतो मे परमपूज्याः ॥५॥
श्रीजयसागरगणिना तेन मया वाचकेन शुचि वाच्यम् ।
पृथ्वीचन्द्रचरित्रं विरचितमुचितप्रविस्तारम् ॥६॥
प्रह्लादनपुरनगरे त्रि बिन्दु-तिथि(१५०३)कृतो ग्रन्थः ।
माल्हश्रावकवसतौ समाधिसंतोषयोगेन ॥७॥
अभ्यर्थनया सत्यरुचेः साहाय्यकारिणि रत्नचन्द्रे ।
उपक्रमोऽयं फलवान् ममाभूत् क्रिया हि साहायकसव्यपेक्षा ॥८॥
यद्गदितमल्पमतिना न्यूनाधिकमर्थजातमिह किञ्चित् ।
विद्वद्भिरमलधीभिः प्रसादमाधाय तच्छोध्यम् ॥९॥
अनुष्टुभां सहस्रे द्वे संपूर्णानि शतानि षट् ।
चतुःपञ्चाशदन्या च ग्रन्थमानमुदाहृतम् ॥१०॥
अङ्कतोऽपि ग्रन्थाग्र० २६५४ ॥ कृतिरियमुपाध्यायश्रीजयसागरस्य ॥

स्वस्ति श्रीअणहिलपुरपत्तनवास्तव्यमन्त्रिझिणाभार्याआसलदे–तत्सुतसा० वर्जाङ्ग-सुश्रावकेण भ्रातृसा० समरसिंहभ्रातृजसालिगप्रमुखपरिवारसहितेन चरित्रमिदं ज्ञाना-राधनबुद्ध्या लेखितम् । लिखितं लैया जैनारायण पीरौहत (पुरोहित), मध्ये बीकानेर । संवत् १९६० रा मिति । भाद्रवा सुद ४ ॥

अन्तः— श्रीमत्तीर्थपतिर्जगत्त्रयमतः श्रीवर्धमानप्रभु-
जीयात् तत्पदपङ्कजैकमधुकृत् श्रीमत्सुधर्मा गुरुः ।
तत्संतानसमुद्भवा युगवरा देवर्धिमुख्यास्ततः
पूज्यश्रीहरिभद्रसूरिगणभृद्वर्या गणाधीश्वराः ॥१॥
सज्ज्ञानाद्भुतवर्धमानसुगुरुश्चारित्रिणामग्रणीः
श्रीमत्सूरिजिनेश्वरः सुविदितः श्रीजैनचन्द्रस्ततः ।

संविज्ञोऽभयदेवसूरिमुनिराट् श्रीमज्जिनाद् वल्लभः
पूज्यः श्रीजिनदत्तसूरिगणभृन्मुख्या मुनीन्द्रास्ततः ॥२॥
सूरीन्द्राः सुतरां जिनादिकुशलश्रीजैनभद्रादय-
स्ते सर्वेऽपि जयन्त्वमी ध्रुवं जु(यु)गप्राधान्यमाबिभ्रतः (?) ।
येषां सर्वहितैषिणां सुमनसां सद्वाक्सुधास्वादतो
मादृग्मोहविमूर्छितोऽपि झटिति प्राप्तः प्रबोधाङ्कुरम् ॥३॥
(त्रिभिः संबन्धः)

अपि च,
यन्मादृशोऽपि मूढो महतो गुणवर्णनोद्यतो भवति ।
तत्र ज्ञानदयानिधिगुरुप्रसादो हि सद्धेतुः ॥४॥
इति सद्गुरुस्तुतिमङ्गलम् ॥
वर्षे नन्द-कृशानु-सिद्धि-वसुधा(१८३९)संख्ये नभस्ये सिते
पक्षे पावनपञ्चमीसुदिवसे श्रीजेसलाद्रौ पुरे ।
श्रीमच्छ्रीजिनलाभसूरिगणभृत्तुल्यप्रतापोद्धुरे
कान्ते श्रीजिनचन्द्रसूरिमुनिपे धर्मेशतां बिभ्रति ॥५॥
सूरिश्रीजिनभक्तिभक्तिनिरताः श्रीप्रीतितः सागरा-
स्तत्शिष्यामृतधर्मवाचकवराः सन्ति स्वधर्मादराः ।
तत्पादाम्बुजरेणुरासवचनस्मर्ता विपश्चित् क्षमा-
कल्याणः कृतवान् मुदे सुमनसामेतच्चरित्रं स्फुटम् ॥६॥
उत्सूत्रमिह यदुक्तं मोहात् तद् दुरितमस्तु मे मिथ्या ।
यदवापि पुण्यमस्मात् तुष्यतु सकलोऽपि तेन जनः ॥७॥

इति परमपवित्रं श्रीयशोधरनरेन्द्रचरित्रं सद्भिर्वाच्यमानं चिरं नन्दतु ॥

संवत् १९१९ रा साके १७८४ प्रवर्त्तमाने मासोत्तममासे कृष्णपक्षे द्वादश्यां तिथौ मङ्गलवासरे श्रीबृहत्खरतरगच्छे भट्टारकोत्तमभट्टारक श्रीश्री १०८ श्रीहर्षसूरिजीसूरीश्वरजी तच्छिष्यश्रीहंसराजजीगणि तच्छिष्यलघुपं० कल्याणनिधान-मुनिना लिखितेदं पुस्तकं स्वपठनहेतवे । जं०यु०प्र०भट्टारकप्रवर्तमाने भट्टार-कोत्तम१०८ श्रीजिनहंससूरिजीनां विजयराज्ये लि० सहिर मकसूदाबादे महिमा-पुरे चतुर्मासीकृतः ॥ जलाद् रक्षेत्० ॥

अन्तः—आमूलान्मधुरोऽत्र गच्छगहने तापापहारप्रभु-
र्नित्यानन्दसुपर्वभिः परिचितः स्वर्गश्रिया राजितः ।

प्राग्वाटान्वय इक्षुवाटसुभगो वृद्धिं परां प्रापितो
यैः पूज्यैरतिशायिसंवररसासाराद्वचतात्युन्नतैः ॥१॥
शिष्य-प्रशिष्यैः प्रसूतैर्यदीयैर्गच्छो वटो वा ववृधे प्ररोहैः ।
तस्मिन् बृहन्नामनि मूलकल्पाः श्रीसर्वदेवाभिधसूरयस्ते ॥२॥
बभूवुरुत्सर्पिगणाधिपत्याः श्रीगौतमस्यानुकृतिं दधानाः ।
सत्याहितस्वान्ततया प्रसिद्धसौभाग्यलक्ष्याद्भुतकीर्तिभाजः ॥३॥
तत्पट्टे प्रथिते सुवर्णघटिते कल्याणकुम्भोपमाः
श्रीमन्तो जयसिंहसूरिगुरवः सिद्धा[? न्त]दुग्धार्णवाः ।
दत्तो यैर्विधिमार्गदविधा (?) वादेशदीपाङ्कुरः
शिष्याणां विनयैकतानमनसामाचार्यलक्ष्मीभृताम् ॥४॥
श्रीमच्चन्द्रकुलोदयाद्रिशिखरोत्तंसाः सुधांशुश्रियः
श्रीचन्द्रप्रभसूरयो जिनवचःक्षीरार्णवोल्लासिनः ।
मोहध्वान्तमपास्य भव्यकुमुदोद्बोधामृतास्तेऽभवन्
यत्कीर्तिर्धवलीकरोति भुवनं ज्योत्स्नातुलां बिभ्रती ॥५॥
तैर्दत्तामुपलभ्य निर्मलकलां श्रीधर्मघोषप्रभु-
र्भास्वांस्तीव्रतपःप्रतापकलितो जज्ञे ददद्विस्मयम् ।
नानाद्यकुतीर्थतारुचि . . व्यासप्रहाणोद्यतो
माद्यद्वादिकुशीलकौशिकमदोद्रेकापहारक्षमः ॥६॥
आदिष्टा जयसिंहसूरिभिरमी चात्मीयशिष्योत्तमा
विख्याता जगति क्षमाधरशिरोऽलङ्कारलीलास्पृशः ।
पूज्याः शीलगणे तपागणभृतो येऽखण्डवृत्तोदया
निन्युश्चन्द्र इव प्रकाशपदवीपूर्णामिमां पूर्णिमाम् ॥७॥
गच्छेऽस्मिन् प्रसृते क्षमानुगगुणैः शाखाभिरभ्युन्नते
येषां कुन्दसमुज्ज्वलेन यशसा पुष्पायितं सर्वतः ।
तद्गन्धग्रहणे ग्रहैकरसिका भव्यालयोऽहर्निशं
संगीतं प्रथयन्ति संमदरसस्यापानतः स्वेच्छया ॥८॥
चञ्चच्चन्द्रकुले चरित्रनृपतेः श्रीराजधान्यामिह
प्रासादेषु महाव्रतेषु सुदूरारोहाग्रभागेष्वियम् ।
येषां कीर्तिरमन्दमन्दरपरिभ्रान्तक्रमोल्लासित-
क्षीराम्भोधिविलोलवीचिरुचिरात् तेने पताकावली ॥९॥

यदीक्षा सुकृतोदयेन कृतिनां दाक्षायणीनायक-
ज्योत्स्नेव प्रमदं विकाश्य कुमुदं दूरे रजांस्यस्यसि(ति)।
संतापं हरते गुणौघमनघं दुग्धोदधिं वर्धय-
त्यस्मात् संवरवीचिसंशयवशान्मुक्तात्मलाभो भवेत् ॥१०॥
सिंहस्यापि लघोः क्रमेण भविता शौर्यं करीन्द्रापहं
बालस्यापि रवेर्महः प्रतिदिनं दृष्टं प्रतापावहम्।
एवं ज्ञानदशा विभाव्य वयसि स्वल्पेऽपि तैः श्रीमतां
येषां शीलगणाभिधैः स्वगुरुभिश्चक्रे पदस्थापना ॥११॥
तेषां चिरं गच्छपतित्वभाजां श्रीमानतुङ्गाभिधसूरिराजाम्।
शिष्या बभूवुर्गुण[रत्न]रत्नाकरा वृत्तधरा धरित्र्याः (?) ॥१२॥
तेषु श्रीमलयप्रभाख्यगणभृद् गच्छाधिराजोऽजनि
ज्ञानोद्भूदयशैलशृङ्गसुभगोऽनुल्लङ्घ्यमानोन्नतिः।
ख्यातो यः सह शेषसूरिभिरिह स्वीयैः क्षमामण्डले
सूर्यो द्वादशमूर्तितामधिगतो भव्याम्बुजोद्बोधकः ॥१३॥
एवं गुरुपर्व्वक्रमसंबन्धे जयति वीरजिनतीर्थे।
श्रीमानतुङ्गगुरुभिः कृते जयन्त्या महासत्याः ॥१४॥
प्रश्नोत्तरप्रकरणे परिवाराभ्यर्थने स्वगुरुभक्त्या।
अतिसक्तधर्मचन्द्राभिधगणिना भागिनेयेन ॥१५॥
भणितैः श्रीमलयप्रभसूरिभिरेषा विचित्रदृष्टान्तैः।
संवेगाय यथामति जगति जयन्तीकथा प्रथिता ॥१६॥
हंसोऽयं गगने प्रभातमुखतः क्रीडासरस्यन्वहं
यावत् सान्द्रतमिस्रशैवलमलं दूरेऽत्युदस्य क्षणात्।
धत्ते सर्वदिशां मुखाम्बुजवने संचारलीलायितं
संतोषं सुधियां ददात्वविकलं तावज्जयन्तीकथा ॥१७॥

*

दिव्यश्रीसदनं सदा क्षितिधराधारः मुखस्थापदं
क्षोणीमण्डलमण्डनं सुविदितः प्राग्वाटवंशोऽस्ति सः।
यत्र छत्रपरम्परावतिता संप्राप्य पर्वस्थितिं
जायन्तेऽद्भुतमत्र वाञ्छितफलैः सौहित्यभाजो जनाः ॥१॥

मुक्तावन्ततवंशे समजनि विदितो थाहडः श्रेष्ठिवर्यः
सद्वृत्तः कान्तकीर्तिः प्रवरगुणगणः प्रासूतिः शास्त्रदोषः ।
आनन्दाधारमूर्तिस्त्रिभुवनभवनोत्सङ्गरङ्गत्सुकीर्तिः
स्फुर्जत्पुण्यप्रबन्धोद्भवदशविलसत्प्राभवत्स्फूर्तिपूर्तिः ॥२॥
नयविनयविततिविठपितसितांशुसितकीर्तिधवलितदशाशः (?) ।
पुण्यावारपवित्रसूत्रपुत्रो धवलनामाऽसीत् ॥३॥
अजनीह मरुसंज्ञा मरुस्थली पापपङ्कजवनस्य ।
तस्य प्रवरा जाया विशुद्धशीला विगतमाया ॥४॥
तत्पुत्री ठकुराणी समभवदसमक्षान्तिविस्तीर्णशाला
नाऊनामा शशाङ्कद्युतिधवलगुणैः साधुशस्यैर्विशाला ।
धर्मानुष्ठाननिष्ठा विधिवशविकसत्कीर्तिसंभारसारा
प्राज्यस्फुर्जद्विवेकप्रतिहतविततोद्दामदुर्वारमारा ॥५॥

इतश्च,

सञ्जातोऽत्रैव वंशे निरुपममहिमा भाग्यसौभाग्यभूमिः
श्रीपालष्ठक्कुराद्याः प्रथितशुचियशाः.... ....
या गतेषु द्वादशवर्षशतेषु विक्रमतो गतेषु षष्टितमे ।
वर्षे ज्येष्ठमासे श्रवणे भे कृष्णपञ्चम्याम् ॥१॥
जीवादिविषयसंशयतमोऽपहारैकतरणिरुचिरा ।
योगे चन्द्रे सिद्धावियं जयन्तीकथा रचिता ॥२॥
मोहमहीपतिविजये चतुरङ्गबलेन शुचिगुणस्यूता ।
इह जगति वैजयन्ती जयतु जयन्तीकथा सुचिरम् ॥३॥

[1092]

अन्तः— तवगणगयणदिणिंदा जुगपवरा सोमसुन्दरमुणिंदा ।
जेसिं जयम्मि अज्ज वि जसपडहो वज्जए सज्जो ॥१॥
तेसिं कमेण जाया सिरिलच्छीसायरा जुगप्पवरा ।
जेसिं मुणीसराणं महिमं को वण्णिउं तरइ ? ॥२॥
तप्पट्टपुव्वपव्वयदिप्पंतदिणेसरा जुगप्पवरा ।
सिरिसमुद्दसाहुसूरीसरा य दाणिं जयंति जए ॥३॥
सोहग्गजुग्गविज्जाकिरिआसंविग्गयापहाणेहिं ।
सूरिगुणेहिं न सरिसो जेसिं न हु दीसए अन्नो ॥४॥

सिरिजिणहरिसमुणीसा पंडिअसिरसेहरा विणेयवरा ।
जणहरिसं जणयंता तेसिं जाया निअगुणेहिं ॥५॥
तेसिं महामुणीणं उवमाणं कहइ समेइसुरसूरी ।
चउवीसं मुणिणो जं जेसिं विबुहाहिवा जाया ॥६॥
तेसिं सीसवयंसा वायंगणवाइलद्धसुद्धजसा ।
सिरिसाहुविजयविबुहा जयंति जणजणिअपडिबोहा ॥७॥
तं तेसिं पुज्जाणं माहप्पमणुत्तरं परिप्फुरई ।
अम्हारिसा जडा जं कुणंति हरिसं निअवएहिं ॥८॥
सुहवद्धणेण तेसिं सीसवयंसेण अप्पमइएण ।
दससड्ढाण चरिअं उद्धरिअं सत्तमंगाओ ॥९॥
पनरसछायालीसे (१५४६) आसोमासम्मि सुद्धदसमीए ।
सुहचाररिक्खजोए लिहिअं चरिअं पवित्थरओ ॥१०॥
इति दशश्रावकचरित्रं समाप्तम् ॥ सं० १९६६ माहसुदि ५ ॥

[1096]

अन्तः—आसी कुंदेन्दुसुद्धे विउलससिकुले चारुचारित्तपत्तं
सूरी सेयंबराणं वरतिलयसमो सव्वदेवाभिहाणो ।
नाणासीसप्पसाहापडियमहिमो कप्परुक्खो व्व गच्छो
जाओ जत्तो पवित्तो गुणसुरसफलो सुप्पसिद्धो जयम्मि ॥१॥
तेसिं चासी सुयजलनिही खंतदंतोपसंतो
सीसो वीसो सियगुणगणो नेमिचंदो मुणिंदो
जो विक्खाओ पुहइवलए उग्गचारी विहारी
मन्ने नो से मिहिर-ससिणो तेयकंतीहि तुल्ला ॥२॥
तेसिं च सीसो पयईजडप्पा अदिट्ठपुव्विल्लविसिट्ठसत्थो ।
परोवयारेक्करसावियड्ढो जाओ निसग्गेण कइत्तकोड्डी ॥३॥
जो सव्वदेवमुणिपुंगवदिक्खिएहिं साहित्त-तक्क-समएसु सुसिक्खिएहिं ।
संपाविओ वरपयं सिरिचंदसूरिपुज्जेहि पक्खमुवगम्म गुणेसु भूरि ॥४॥
संवेगंबुनिवाणं एयं सिरिसंतिसूरिणा तेण ।
वज्जरियं वरचरियं मुणिचंदविणेयवयणाओ ॥५॥
जइ किंचि अजुत्तं वुत्तमेत्थ मइजड्डरहसवित्तीहिं ।
तमणुग्गहबुद्धीए सोहेयव्वं छइल्लेहिं ॥६॥

इगतीसाहियसोलससएहिं (१६३१) वासाण निव्वुए वीरे ।
कत्तियचरिमतिहीए कत्तियरिक्खे परिसमत्तं ॥७॥
जयइ पयइसुद्धं अंगुलीहेमवत्तं सहयसुहयगंधं भव्वभिंगोहजुट्ठं ।
वियसियममिलाणं पावपंकेकमुक्कं कयजयसरसोहं वीरपायारविंदं ॥
इय पुहइचंदचरिए एक्कारसमं भवगहणं समत्तं ॥५७७॥
गंथसिलोगपमाणं सत्त सहस्साइं पंच य सयाइं ।
इय पुहइचंदचरिए विणिच्छियं पायसो गणिउं ॥
अङ्कतोऽपि ७५०० ॥ शिवमस्तु सर्वजगतः ।

[1098]

अन्तः— सिरिवद्धमाणतित्थे कोडियगणम्मि वइरसाहाए ।
चंदकुले वडगच्छे सयंभुरमणे व्व बहुउदए ॥१॥
लच्छीकलाकलावासमाणमेहाहिं सच्चवियनामो ।
जाओ विक्खाओ मुणिइंदो जिणचंदसूरि त्ति ॥२॥
वज्जिरजसपडहारवनच्चावियकित्तितरुणिरयणस्स ।
अणणुगुणरयणनिहिणो गुरुणो सिरिचंदसूरिस्स ॥३॥
विरइयबहुप्पबंधो गुरुपयसरणोवलद्धसुहलेसो ।
एसो विणेयलेसो जाओ हरिभद्दसूरि त्ति ॥४॥
इत्तो य,
सिरिपोरुयाडवंसे सुवणिओ सुयणहिययकयवासो ।
मुत्तामणि व्व निन्नयअभिहाणो ठक्कुरो आसि ॥५॥
अह पयडीहूअसिरिदेवीउवइट्ठअसमअब्भुदओ ।
सो सिरिमालपुराओ पत्तो गंभूयनयरीए ॥६॥
तत्थ य तग्गेहमहासरम्मि विलसंतविउलकमलम्मि ।
पायडियकुसुमवणरायमंडलोवचियपयविहवो ॥७॥
पसरंतगंधसिन्धूरघडाहिं वग्गंततुरयघट्टेहिं ।
कस्स न जणेइ विम्हयमणेगसो उदयवित्थारो ॥८॥
जइणणयमइणा अणहिल्लपुरे वणरायनिवइनीएण ।
विज्जाहरगच्छे रिसहजिणहरं तेण कारवियं ॥९॥
तत्तो विचित्तनयपत्तकित्तिपसराओ रयणनिहिणो व्व ।
बहुसंख-सुत्तिसुहओ जाओ लहरो त्ति दंडवई ॥१०॥

वग्गंततुरयघट्टस्स विंझगिरिसंनिवेसपत्तस्स ।
समग्गगहियकुंजरघडस्स तह नियपुरसमुहं ॥११॥
आगमिरस्स रिऊहिं तग्गयगहणूसुएहिं सह समरे ।
जस्सेह विंझवासिणिदेवी धणुहम्मि अवइण्णा ॥१२॥
ता पत्तसत्तुविजएण तेण सा विंझवासिणी देवी ।
धणुहाविअवरनामा ठविया संडत्थलग्गामे ॥१३॥
अह लच्छि-सरस्सईओ सद्धम्मगुणाणुरंजियाओ व्व ।
जस्सुज्झियईसाओ मुंचंति न संनिहाणं पि ॥१४॥
तह सिरिवरोवलद्धो जेण पडो रायटंकसालाए ।
संठविओ लच्छी उण निवेसिया सयलमुद्दासु ॥१५॥
सो चोलुक्कस्सिरिमूलराय-चामुंडरायरज्जेसु ।
वल्लहराय-नराहिवदुल्लहरायाणमवि काले ॥१६॥
निच्चं पि पक्कमंती जाओ पज्जंतचरियचारित्तो ।
सिरिमूलरायनरवइम(र)ज्जालंकुरो वीरो ॥१७॥
तस्स उ सिरिसरस्सइदेवीण पुढो पुढो निवासस्स ।
दो पुरिसपुंडरीया जाया वसुहाए विक्खाया ॥१८॥
तत्थ य निहणियदोसो पयडियकमलोदओ दिणयरुव्व ।
सिरिभीमएवरज्जे नेढो त्ति महामई पढमो ॥१९॥
बीओ य सरयससहरनिम्मलगुणरयणमंदिरमुदारं ।
नियय्पहावअहिरयतरणी विमल त्ति दंडवई ॥२०॥
अह भीमएवनरवइवयणेण गहियसयलरिउविहवो ।
चड्डावल्लीविसयं स पहुवलद्धं ति भुंजंतो ॥२१॥
दट्ठूण तियसभवणारोहंतपसत्थजंतुनिस्सेणिं ।
सिरिनंदिवद्धणापरनामं अब्बुयगिरिंदमिमं ॥२२॥
नणु विविहसंविहाणयधरमुत्तिमतित्थमवि इमो सिहरी ।
इय जइ इमस्स उवरिं कारिज्जइ रिसहजिणभवणं ॥२३॥
ता कयकिच्चं मन्ने सजीवियव्वं बलं च लच्छि च ।
इय चिंतंतो सिविणे अंबाएवीए भणिओ सो ॥२४॥
जइ भद्द ! सुंदरमिमं चिंतियमिय हिययइच्छियं कु[ण]सु ।

तुज्झ बिइज्जा होउ करेस्स महियंपि साहेज्ज ॥२५॥
सिरिभीमएवनरवइ-नेढाण वि पत्तुयत्थउवएसं ।
वियरइ देवी तक्खणमह सो तेहिं वि अणुण्णाओ ॥२६॥
सिरिरिसहबिंबदिणयरउज्झोइयमज्झमूसियपडायं ।
सुविभत्तचित्तसालं जिणसासणभणियनीईए ॥२७॥
पयडीहोउं अंबाएवीउवइट्ठसंनिवेसम्मि ।
अब्बुयगिरिणो उवरिं जिणभवणमिणं करावेइ ॥२८॥
अह नेढमहामइणो तणओ सिरिकण्णएवरज्जम्मि ।
जाओ नियजसधवलियभुवणो धवलो मंतिवरो ॥२९॥
तत्तो य रेवंतकयप्पसायसंपत्तउत्तिमसमिद्धी ।
धणुहाविदेवयासंनिहाणनिन्नट्ठउवसग्गो ॥३०॥
जयसीहएवरज्जे गुरुगुणवसउल्लसंतमाहप्पो ।
जाओ भुवणाणंदो आणंदो नाम सचिविंदो ॥३१॥
तस्स ससिविमलसीलालंकारविरायमाणसव्वंगी ।
गुरु विणय-प[णय]वच्छल(ल्ल)धम्मकम्माणुरत्तमणा ॥३२॥
अहवा समग्गजयकयविम्हयगुणरयणपरममंजूसा ।
पउमावइ त्ति नामेण विस्सुया पिययमा जाया ॥३३॥
अह सिद्धराय-सिरिकुमरवालएवावणिंदतिलयाणं ।
पुण्णभरभारविहुरियमिव दट्ठूणं पुहइपीढं ॥३४॥
आणंदमहामइणो जयसुकयसंचएणं च ।
वयगर[ण–स्सिरिगर]णारंभमहाभारधुरधवलो ॥३५॥
जयसीहएव-सिरिकुमरवालनरनायगाण रज्जेसु ।
सिरिपुहइवालमंती अवितहनामो इमो विहिओ ॥३६॥
अह निन्नयकारावियजालिहरयगच्छरिसहजिणभवणे ।
जणयकए जणणीए उ पंचासरयपासगिहे ॥३७॥
वजु(चड्डा)वलीयम्मि य गच्छे मायामहीए सुहहेउं ।
अणहिल्लवाडयपुरे कराविया मंडवा जेण ॥३८॥
रोहावियवारसागसायणवाडयपुरे उ संतिस्स ।
जिणभवणं कारवियं मायामयवोल्हयस्स कए ॥३९॥

अब्बुयगिरिम्मि सिरिनेढ–विमलजिणमंदिरे करावेउं ।
मंडवमईवविम्हयजणयं पुरओ पुणो तस्स ॥४०॥
विलसिरकरेणुयाणं सवंसपुरिसोत्तमाण मुत्तीओ ।
विहियं च संघभत्तिं बहु[पु]त्थय–वत्थदाणेण ॥४१॥
निच्चंपि महामइणो तेण कयत्थीकओ धुवं अप्पा ।
अह सविसेस सजणणी-जणयप्पाणं सुकयरुइणो ॥४२॥
निरुवमसरस्सईवरपहावउवलद्धवंछियत्थस्स ।
दुन्नयतमभररविणो नयपहासारहिसिरोमणिणो ॥४३॥
नर-नारि-करि-तुरंगम-रयणापरिक्खाविहाणदक्खस्स ।
अब्भत्थणाए सिरिपुहइवालसचिवाहिरायस्स ॥४४॥
सिरिचन्दसूरिगुरुपयपउमायर पुव्वसरणअणुहावा ।
संमाणहिगयसत्थविसेसेण वि अप्पमइणा वि ॥४५॥
हरिभद्दसूरिणा सव्वदेवगणिविहियसंनिहाणेण ।
पुव्वकइंदपरम्परविरइयगंथेऽवलोएउं ॥४६॥
अणहिल्लवाडयपुरे सिरिकुमरप्पालएवरज्जम्मि ।
सिरिमल्लिनाहपहुणो सिरिभिस्सयगणहरजुयस्स ॥४७॥
कह कहवि समक्खाओ लेसेण इमो तइयपत्थावो ।
तत्तो महापसायं काऊण महोवरिं सुयणा ॥४८॥
जं किंचि मए अणुचियमुवइट्ठं सुज्झवेह तमसेसं ।
नहि दिणयरस्स उदये अवयासो तिमिरनियरस्स ॥४९॥
सिरिमल्लिनाहचरिए हरिभद्दमुणीसरेहिं पविरईए ।
परमपयं तो तइओ पत्थावो संपवक्खाओ ॥५०॥
श्रीमल्लितीर्थाधिपसच्चरित्रप्रस्तावदीपं विशदं हृदीमम् ।
भव्याः कुरुध्वं स्वतमस्ततीनां यद्यस्ति विच्छेदमतिस्तदानीम् ॥५१॥छ॥
जाव ससी जाव रवी निययपयावेण पयडए भुवणं ।
ता मल्लिनाहजिणवरचरियमिणं जयउ जीयलोए ॥५२॥
यस्यांह्रिद्वयनखमणिमयूखसंक्रान्तसुरपतिश्रेणी ।
निजलघुतामिव कथयति जयत्वसौ मल्लिजिननाथः ॥५३॥
उद्यल्लक्षणशास्त्रसंचयनिधीन् सद्धर्ममुदावधीन्
सिद्धान्तैकसहस्रपत्रतरणीन् सद्वादिचूडामणीन् ।

तर्कार्ध्वन्यतरून् मनोभववधूवैधव्यदीक्षागुरून्
साहित्यामृतसागरान् मुनिवरान् श्रीचन्द्रसूरीन् स्तुवे ॥५४॥छ॥
इति श्रीचन्द्रसूरिक्रमकमलभसलश्रीहरिभद्रसूरि-
रचिते श्रीमल्लिचरिते निर्वाणवापको
नाम तृतीयः प्रस्तावः ॥

गाथाकाव्य ६७०८ ॥ ग्रन्थाग्रम् ९००० ॥ संवत् १६६२ वर्षे पोषमासे कृष्णपक्षे चतुर्दशीतिथौ त्रीग(भृगु)वासरे लिखितं महं० कहानजीसुतगोवर्धनः ॥

[1108]

अन्तः— अब्भक्खाण विवागसूयमिणं संवेगसंसाहगं
सव्वेसिं पि जणेण विम्हयकरं सीलप्पसंसापरं ।
किं वीराहवलक्खणेहि सहिउ लंकाहिवेणं तहा
सीयादेविमहासईइ चरियं संखेवओ साहियं ॥
नाऊणं परिभाविऊण हियए सम्मं इमं सव्वहा
अब्भक्खाणमसंखदुक्खजणगं वज्जेह भव्वा जणा ।
सीलं सव्वगुणाण भूसणकरं निव्वाणसंपायगं
खंडिज्जंतमलं .... सियलं रक्खेह निच्चं तहा ।
एवं सीयाचरियं वज्जरियं सेणियस्स नरवइणा ।
जह णायमेण तह महसूरीहिं निवेइयं किंचि ॥

ग्रन्थाग्रम् ३४०० । इति धर्माधर्मविचारे सीताइचरित्तं ॥

[1165]

अन्तः— इति श्रीशत्रुञ्जयमाहात्म्यं धनेश्वरसूरिकृतं समाप्तं संपूर्णम् ।

संवत् १८५२ ना वर्षे मागसरमासे शुक्लपक्षे पञ्चमीतिथौ ५ बुधवारे धनिष्ठानक्षत्रे हर्षणनामायोगे तपागच्छे राजवल्लभाभिधे भट्टारकश्री १०८ श्रीराजविजयसूरि-तत्पट्टे भट्टारकश्री १०८ श्रीरत्नविजयसूरि-तत्पट्टे भट्टारकश्री १०८ श्रीहीररत्नसूरिः, तत्पट्टे भट्टारकश्रीजयरत्नसूरिः, तत्पट्टे भट्टारकश्री १०८ दानरत्नसूरिः तत्पट्टे भट्टारकश्री १०८ श्रीकीर्तिरत्नसूरिः, तच्छिष्यपादरजःमुनिना ऋद्धिरत्नेन लिपीकृतम् । भट्टारकश्री १०८ श्रीमुक्तिरत्नसूरिराजैः लिपीकृतम्, श्रीभीडभञ्जनप्रभुप्रसादात् श्रीखेटकपुरमध्ये सेठी-वात्रकनद्यास्तटे ॥

[1265]

अन्तः— वृत्तरत्नाकरे वृत्तिं गणिः समयसुन्दरः ।
षष्ठाध्यायसंबद्धा पूर्णीचक्रे प्रयत्नतः ॥२॥

संवति विधिमुख-निधि-रस-शशि(१६९४)संख्ये दीपपर्वदिवसे च ।
जालोरनामनगरे लुणिया कसलार्पितस्थाने ॥२॥
श्रीमत्खरतरगच्छे श्रीजिनचन्द्रसूरयः ।
तेषां सकलचन्द्राख्यो विनेयः प्रथमोऽभवत् ॥३॥
तच्छिष्यसमयसुन्दर एतां वृत्तिं चकार सुगमतराम् ।
श्रीजिनसागरसूरिप्रवरे गच्छाधिराजेऽस्मिन् ॥४॥
यः कोऽपि मत्सरी मूढः प्रशस्तिं न लिखिष्यति ।
स लोके लप्स्यते निन्दां कुणिर्भावी परत्र च ॥५॥

इति वृत्तरत्नाकराख्ये छन्दसि । श्रीसमयसुन्दरोपाध्यायविरचितायां वृत्तरत्नाकर-सुगमवृत्तौ षष्ठोध्यायः संपूर्णः ॥ ग्र० १३००॥

संवत् १७१५ प्रमिते श्रावणवदिपञ्चमीतिथौ पं० श्रीराजसुन्दरगणिशिष्य-भुजिष्यपं०रूपसुन्दरगणिनाऽलेखि श्रीजयतारणनगरे ॥

[1269]

अन्तः—श्रीलब्धिवर्धनमुनेर्विनयी विनेयो विद्यावतां क्रमसरोजपरीष्टिपूतः ।
चक्रे यथामति शुभां शिवचन्द्रनामा वृत्तिं विदग्धमुखमण्डनकाव्यसत्काम् ॥१॥
नन्दर्तु-भूपाल(१६६९)विशालवर्षे हर्षेण वर्षात्ययहर्षदर्तौ ।
मेवाति देशे लवराभिधाने पुरे समारब्धमिदं समासीत् ॥२॥
विख्यातः शासनेऽस्मिन् प्रवरखरतराभिख्यगच्छो गरीयान्
यस्मिन् योगेन्द्रमुख्या जिनकुशलवराः सूरयः संबभूवुः ।
चारित्राचारचञ्चुर्विहितयतिनतिः सूरिराड् जैनसिंहः
सिंहो वादिद्विपानां श्रुतजलजलधिः शास्ति भट्टारकत्वम् ॥३॥
श्रीलब्धिवर्धनमुनिर्महिमैकमेरुः श्रीजैनसिंहसुगुरोरजनिष्ट शिष्यः ।
येषां कुशाग्रधिषणा सुपदप्रविष्टा शिष्याः समीयुरवनीशसमाजभाजः ॥४॥
ऊकेशवंशे परिलब्धजन्मा जग्राह दीक्षां विधिवद् गणेऽस्मिन् ।
भ्रातुः क्षमाचन्द्रगणेर्निदेशवृत्तिं प्रकुर्वे शिवचन्द्रनामा ॥५॥
अथाग्रे कविना गर्वापहारः—
क्रियते यत् किञ्चिदिह विरुद्धं यदशुद्धं वा व्यलेखि मतिमान्द्यात् ।
कृत्वा मय्यनुकम्पां तच्छोध्यं धीधनैः सदयैः ॥६॥

इति श्रीधर्मदासकविविरचिते विदग्धमुखमण्डने काव्यालङ्कारे श्रीबृहत्खरतर-गच्छे पण्डितश्रीलब्धिवर्धनमुनेः शिष्यशिवचन्द्रेण कृता सुबोधिका नाम चतुर्थपरिच्छेदस्य वृत्तिः ॥ वृत्तेः प्रमाणमिदम्—२५०४ ग्रन्थाग्रमेतद् विज्ञेयं लोकैरित्यलम् ॥

[1282]

अन्तः— देशानां वरदातटं वरमतः स्वार्थाभिधानं महा-
स्थानं वेदपदं सदग्रजगणाग्रण्यं सहस्रं द्विजाः ।
तत्रामीषु धनेश-केशव.. विद्वद्वैद्यौ वरिष्ठौ क्रमा-
च्चक्रे शिष्यसुतस्तयोः कृतिमिति श्रीबोपदेवः कविः ॥१॥
कैलासाचलमौलिमण्डनमणेर्नृत्योत्सवे यद्यशो
गायन्ति त्रिदशाङ्गनाः कलरवा गम्भीरतारस्वनैः ।
चक्रे यश्च कलांशगोपितशतश्लोकीं पदोल्लासितां
स त्रैलोक्यमहाकवीन्द्रतिलकः श्रीबोपदेवः कविः ॥२॥

इति योगराजसमुच्चये शतश्लोकी क्वाथाधिकारः संपूर्णः ॥

संवत् १८६६ ना वर्षे वैशाखसुद ७ गुरौ लिखितं वैद्यसकरदास भुखणदास तस्य पठनार्थे भाइ भगवानदासपठनार्थम् ।

द्वे द्वे लोचने सर्वेषां विद्या तृतीयलोचनम् ।
चतुर्थं लोचनं धर्मः ज्ञानी अनन्तलोचनः ॥

वैद्य भगवान् संकरः भुखणकुयरजी रेवादास कल्याण मकनदास मूल वतन गाम साणंदना वैद्यराज उल्लास करीने भणजो ।

[1298]

इति सन्ध्यापाचकदशाफलं संपूर्णम् ।

तपोगणो नागपुरीयपूर्वे श्रीचन्द्रकीर्त्याह्वयसूरिराजाः ।
तेषां विनेयर्षभहर्षकीर्तिसूरिस्त्विमां पद्धतिमुद्दधार ॥१॥
पुण्यैरेवार्थसंसिद्धौ सत्यां स्रग्गुम्फनं यथा ।
तथा प्रकीर्णशास्त्रेषु सत्सु पद्धतिर्निर्मिता ॥२॥
यावन्मेरुर्धरापीठे यावच्चन्द्र-दीवाकरौ ।
तावदेषा जन्मपत्रीपद्धतिर्वर्ततां चिरम् ॥३॥

इति श्रीमन्नागपुरीयतपागच्छमण्डनभट्टारकश्रीचन्द्रकीर्तिसूरिशिष्यश्रीहर्षकीर्तिसूरिसंकलितायां जन्मपत्रीपद्धतौ द्वितीयोऽधिकारः ॥ समाप्ता चेयं जन्मपत्रीपद्धतिः ॥

संवत् रस-वेद-मुनि-शशि(१७४३)प्रमिते वर्षे ज्येष्ठवदित्रयोदशीतिथौ शुभदिने भौमवारे नवग्रीहीनगरमध्ये भट्टारकप्रभुश्रीमच्छ्रीश्री १०६ श्रीजिनरत्नसूरीश्वरान्तेवासी शिष्यमुख्यपण्डितप्रवरश्री १०६ श्रीविजयलाभजीगणिवराणां शिष्यः अन्तेवासी पं० विजयशेखरमुनिलिपीकृतम् ॥

आ० श्रीविजयक्षान्तिसूरीणां हस्तप्रतिसंग्रहस्य प्रशस्त्यादिसंग्रहः

[9]

अन्तः— कम्नि-वारण-ग्लौ(१८३१)वर्षे मधुसितेतरपक्षके ।
सभौमद्वादशीघस्रे लिखितोऽयं सुपुस्तकः ॥१॥
क्षमामाणिक्यगणिना श्रीक्षान्तिविजयाग्रहात् ।
आचाराङ्गस्य [च] व्याख्या वाचनीया बुधैर्मुदा ॥२॥

[14]

अन्तः— संवत् १६०५ वर्षे ज्येष्ठवदि १३ रविवारे श्रीअहम्मदावाद-नगरवास्तव्यश्रीश्रीमालज्ञातिशृङ्गारसंघवी श्रीतेजाभार्या....पुत्ररत्नसंघवी श्रीरूपचन्द-संघवी श्रीदेवचंदभार्या इन्द-पुत्रसंघवी सहसकरण-संघवी श्रीगला-संघवीमूला-प्रमुखसमस्तकुटुम्बयुतेन श्रीसू[य]गडांगदीपिका लिखापिता । प्रतिरियं पुण्यार्थं पण्डितश्रीविनयकीर्तिगणिवाच्यमाना चिरं जीयात् ।

संवत् १६८० वर्षे श्रावणसुदि ४ दिने श्रीजावालपुरे श्रीखरतरगच्छे श्रीजिन-राजसूरिधर्मसाम्राज्ये वाचकश्रीहर्षसारगणि-शिष्यश्रीशिवनिधानगणिया[का]नां पुस्तकं शिष्य-प्रशिष्यैर्वाच्यमानं ज्ञानवृद्धयै भवतु ॥

[23]

अन्तः—-अङ्गाक्षि-क्षितिभृत्-सुधाकर[१७२६]मिते संवत्सरे वैक्रमे
क्ष्मामर्तुर्वैरराधमासि धवले पक्षे चतुर्थ्यां तिथौ ।
द्रङ्गे श्रीजयतारणे खरतरे गच्छेऽतिवृद्धे चिरं
राज्यं कुर्वति मानिते नृपतिभिः श्रीजैनचन्द्रे प्रभौ ॥१॥
श्रीयुक्पाठकराजराजविजयाः सौभाग्यभाग्यालया-
स्तच्छिष्याः पटुवाचकाः सुकृतिनः श्रीरूपहर्षाभिधाः ।
तच्छिष्येण तदीयशास्तिचरणप्राप्तप्रशंसेन वै
श्रीमत्सूत्रकृताङ्गवृत्तिरमला पूर्णीकृता लेखनात् ॥२॥
अन्यदीयहस्तेन लिखितमिदम्—
वा० श्री१०८श्रीकेसरीचन्दजीगणीनां शिष्यपं०मोतीचन्द्रकस्यैवम् ॥

[29]

अन्तः—नागोरमध्ये लिपीकृतं लहिया जोशी श्रीवल्लभः ॥

सं० १९७४ फाल्गुन कृष्ण ४ पुस्तक श्रीमान् श्रीमोहनलालजी महाराजना प्रधानशिष्यश्रीजगत्प्रसिद्धपंन्यासजी हरखमुनिजीनी छे ।

[34]

अन्तः—सं० १८७६ रा वर्षे दुतिकयेष्ट (द्वितीयज्येष्ठ) कृष्ण ५ तिथौ गुरुवारे ॥

संवन्नारद-नन्द-काय-शशभृद्(१६९९)वर्षे वरेण्येऽमले
सच्छोभायुतफाल्गुनाह्वयदघन्मासे सतां सम्मते ।
नक्षत्राधिपधौततामसतमे पक्षे विपक्षेऽहसां
पुष्णोष्णांशुपवित्रितोज्ज्वलतिथावेकादशीनामनि ॥१॥

श्रीमन्महिद्रङ्गभवे वरिष्टे गच्छे तपोनामनि सूरिराजाः ।
श्रीपार्श्वचन्द्रा निजनाम दधते (!)ऽभवन् सदभ्यस्तसमस्तशास्त्राः ॥२॥

श्रीसूरिमुख्याः समरेन्दुसंज्ञा वादीन्द्रवदभ्रसमीरतुल्याः ।
सिद्धान्तवारांनिधिगाहनाय प्रेक्षातरण्डं प्रकटीचकार ॥३॥

राजेन्दवः सूरिकुमुद्वतीन्दवः सौभाग्यसारावधिसन्नतांह्वयः ।
सिद्धान्ततत्त्वैकसुधाब्धिसन्निभाः यच्छन्तु शास्त्रं निजसेवकाय ॥४॥

श्रीहीरानन्दचन्द्रा निजमतकुमुदाह्लादने पूर्णचन्द्राः
कुज्ञानध्वान्तवारप्रशमदिनकराः सीर(?)कारुण्यपूर्णाः ।
स्वाभिख्याचन्द्रिकाभिर्धवलितजगतः पाठकव्रातवर्य्याः
पुण्योह्लासिप्रभूतोदयसमुदयभूभूषनास्ते जयन्ति ॥५॥

तेषां विनेयेन सदोदयेन विज्ञानसिद्धान्तनयेन चैव ।
ज्ञाताख्यसूत्रस्य सदर्थशंसी(?सिना) कृतो गणिप्रेमजिता टबार्थः ॥६॥

ग्रन्थाग्रन्थसूत्र ६००० सूत्रार्थ सर्वमिली २२००० । लिखितं पं० रामविजय मु० भतीज(?)प्रमाणविजय उभयौ मिलितेन लिपीकृतं (ता) परत (प्रतिः) प्रमाणविजयगणीनी छे । श्रीवर्गवट्टीनगरे चतुर्मासेन लिखितं श्रीशान्तिनाथजीप्रसादात्, श्रीराजाधिराजश्रीमानसींघजीराज्ये ॥

[37]

संवत् १६३० वर्षे वैशाखशुदिचतुर्दशीगुरुवासरे श्रीमालवामध्ये अवन्तीपुर्यां वास्तव्यप्राग्वाटज्ञातीयवृद्धशाखायां महं श्रीसोनपालभार्या उभयकुलनन्ददायिनी बाई रजां तत्पुत्री श्राविकाशिरोमणिश्रा० वह्लां लिखापिता स्वश्रेयसे समर्पिता श्रीमत्तपागच्छे श्री ५ श्रीहीरविजयसूरिविजयराज्ये पं० देवविजयशिष्यणी साध्वी सहिजश्रीपठनार्थं वाच्यमानं चिरं जयतु, श्रीपार्श्वनाथप्रसादात् शुभमस्तु ॥

[56]

इति श्रीरायपसेणीयउवंगं समाप्तम्। सकलभट्टारकपुरंदरभट्टार[क] १०८ श्रीविजयप्रभसूरीश्वरचरणसे० सकलवाचकचक्रचूडामणिमहोपाध्यायश्री १०८ श्रीविमलविजयगणि तच्छिष्यमहोपाध्यायश्री १०८ श्रीशुभविजयगणि-तच्छिष्यपण्डित श्री-५ पं० रामविजयगणि-तच्छिष्यमुनिहस्तिविजयलिपिकृतं पालणपुरनगरे संवत् १८०१ वर्षे कार्तिकमासे शुक्लपक्षे पञ्चमीतिथौ रविवारे शुभं :भवतु लेखक-पाठकयोश्च आचन्द्रार्कं यावत्। शिवमस्तु० ॥ यादृशं पुस्तकं० ॥

[60]

इति पन्नवणाभगवत्यां समुद्घातपदं छत्तीसमं समाप्तम् ॥३६॥ प्रत्यक्षरगणनया अनुष्टुप्छन्दसः मानमिदम्, ग्रन्थाग्रन्थसंख्यासूत्र ७७८७ प्रमाणम्। इति श्रीपन्नवणासूत्रमिदं समाप्तम् ॥

श्रीमत्तपागणविभासनतापनाभः भव्यान् महदु(?)दयकैरवरात्रिरत्नः।
आसीद् गुरुर्विमलसोमगणाधिराजः सौदर्यधैर्यगुणमण्डलवारिराशिः ॥१॥

गच्छे तत्र विशालसोमगुरवः श्रीसूरयः सांप्रतं
वर्तन्ते महीमण्डले गणपदप्राप्तप्रतिष्ठास्पदम्।
नानावाङ्मयसागराम्बुतरणे सद्बुद्धितावाचिता (?)-
चारित्राचरणेन दुष्करतपःश्रीस्थूलभद्रोपमाः ॥२॥

तद्गच्छेऽभूत् क्रियापात्रं विद्वज्जनशिरोमणिः।
श्रीमद्विनयविमलपण्डितः पण्डिताग्रणीः ॥३॥

तच्छिष्यसेवकः साधुः धनविमलनामतः।
प्रज्ञापनाख्यसूत्रस्य वार्तां चक्रे मनोहराम् ॥४॥

यत् किञ्चिल्लिखितं कूटं सूत्रार्थोभयतस्तथा।
विद्वद्भिः हितकाम्यैश्च सर्वं शोध्यं कृपापरैः ॥५॥

संवद् बाण-रवि-वाह-चन्द्राख्ये (१७१५) मासि माधवे।
गुरुशुक्लतृतीयायां पूर्णीचक्रे स्वबुद्धितः ॥६॥

इति श्रीपन्नवणा-टबार्थः संपू[र्णः]।

संवत् १९३१ना वर्षे फाल्गुणमासे शुल्कपक्षे दशम्यां तिथौ लिपीकृतं मुनिकस्तूरचन्द्रेण स्व-आत्मार्थे लिखी छ(?ब)इन्नदेसमध्ये ॥

[61]

अन्तः—स्तवककारप्रशस्तिस्तु पूर्वप्रत्यनुसारिणी, लेखनप्रशस्तिस्तावदियम्—

संवत् १७६७ वर्षे आसोसुदि २ तिथौ श्रीमङ्गलवासरे लिखितं सकलपण्डितशिरोरत्नपण्डितोत्तमपण्डितश्रीदेवकुशलगणि-तच्छिष्यपं० त्रिधाकुशलपं० चतुरकुशलगणिलिखितं श्रीदेवकपत्तने श्रीदादापार्श्वजिनप्रसादात् ॥

[72]

अन्तः—इति चतुशरणपयनूं संपूर्ण ।

सकलपण्डितसभाभूभामिनीतिलकपण्डितप्रवरपण्डितश्री १९ श्रीदेवविजयगणि—तच्छिष्यपण्डितश्री ५ श्रीकर्पूरविजयगणि-तच्छिष्यपं० षिमाविजयगणिलिपीकृतम् । संवत् १७७८ वर्षे श्रीसिद्धपुरनगरे सुश्राविका पुण्यप्रभाविका श्रा० अगरबाईपठनार्थं शुदि ३ रवौ ॥

[74]

अन्तः—शर-शर-रस-संवद् (१६५५) मिते वर्षे हर्षेण नागपुरनगरे ।

लिखिता विशालसुन्दरविबुधपदाब्जालिसमशिशुना ॥१॥

यदवद्यमिहाज्ञानाल्लिपीकृतं भवति तत् कृपावद्भिः ।

संशोध्यं गीतार्थैर्निर्मात्सर्यैः श्रुतभक्त्या ॥२॥

सूर्या-चन्द्रमसावेतावु[द्य]ततः नुतोऽम्बरे ।

वाच्यमाना बुधैस्तावदियं नन्दतु सर्वदा ॥३॥

शुभं भवतु । कल्याणमस्तु ।

[83, 84, 135]

अन्तः संवत् १५६८ वर्षे शाके १४३४ प्रवर्तमाने कार्त्तिकशुदिप्रतिपदारवौ श्रीश्रीमालज्ञातीयश्रे० देधरसु० ठ० आल्हणसी-सु० पाल्हणसी-सु० सा० जइता-सु० सा० राउल-भा० मचकू-सु० सीधर भा० सोही-सु० सा० जूठा-मेघा-भावड-पांचा । जूठासु० सा० महिपति-रूपा-चउथा-हर्षा-सहिसा । सा० महिपति- भा० पद्माई—सु० सा० डाहीआ-वस्ता-रूपा-भार्याकीबी-सु० राजा-भोजा-जेठा-धर्म्मसी-चउथाभा० मल्हाई-सु० तेजपाल-कर्म्मसी-पांचा-सु० घुसा-भा० पीदो सु० वर्धमान-पामाप्रमुखकुटुम्बयुतेन सा० मेघाकेन ॥

यः सप्तक्षेत्र्यां निजवित्तबीजं वपन् सदा साधुः स मेघराजः ।

सद्धर्मपत्न्यजनि लाडिकाऽस्य तयोरभूत् पुत्रकुलावतंसः ॥१॥

श्रीमन्मण्डपमेरुमौलिमुकुटप्रायं जिनस्यास्पदं
निर्मायोऽद्भुतजैनबिम्बमतुलं संस्थापितं येन वै ।
श्रीशत्रुञ्जय-रैवताद्रिशिखरे यात्रा कृता सोत्सवं
श्रीमदर्बुदशैलराजशिखरे लब्धा प्रतिष्ठा भृशम् ॥२॥
वृद्धतपावरगच्छे स्वच्छे श्रीगगनोपमे ।
सद्वृत्ता श्रीगुरुचन्द्राः लब्धिसागरसूरयः ॥३॥
निशम्य तेषां सहजोपदेशं तस्याङ्गजेनाशु विवेकसेकतः ।
स्वपितृपुण्याय विचक्षणेन श्रीसोनपालेन नरोत्तमेन ॥४॥
स्मृत्वा स्वपितुर्वचनं मेघातनयेन सोनपालेन ।
जिनमतसक्तग्रन्थश्रीकोशो लेखयांचक्रे ॥५॥
गुणसागर-चारित्रगणी कृतसदोद्यमे ।
मातृ-लेश्या-व्रत-ब्रह्ममिते(१५६८) वर्षे च कार्तिके ॥६॥
वरतरसुवर्णरुचिरो निरस्तदौर्गत्यसंभवक्लेशः ।
श्रीसिद्धान्तः सत्कोशः नन्द्याद् भूमण्डलं यावत् ॥७॥

इति सुखमस्तु ॥

[89]

अन्तः—महोपाध्यायश्री १०८ श्रीशुभविजयगणि-तच्छिष्यमहोपाध्यायश्री १०८ श्रीहितविजयगणि—सं० १८३० वर्षे पोससुदि २ दिने वारबुधे प्रभातसमये स्वकीय-वाचनाय श्रीपाल्ह[ण]पुरे ग्रं० ६००० ॥ श्रीरस्तु । कल्याणमस्तु ॥

[90]

अन्तः सं० १५५५ वर्षे तपागच्छनायकश्रीहेमविमलसूरिविजयमानराज्ये ऊपहरावास्तव्यप्राग्वाटजातिशृङ्गार श्रे० राउलभार्यागउरी-पुत्ररत्न सं० देघरभार्या—सं० सलखूसुतसं० अदाभगिनी-भ्रातृसं० नपादिकुटुम्बयुतेन स्वश्रेयसे पूज्याराध्यपं० सत्य-रत्नगणिशिष्यपं० सुन्दरसत्यगणीनामुपदेशेन श्रीकल्पसूत्रं लिखापितम् ॥

[94]

अन्तः—इति श्रीकल्पसूत्रं संपूर्णम् । सूत्रसंख्या १२१६ । टबो ३४३६ ॥

अक्खरमत्ताहीणं जं किंचि पढियं अयाणमाणेणं ।
तं खमह मज्झ सयं जिणवयणविणिग्गया वाणी ॥१॥

संवत् चन्द्र-शर-मुनि-चन्द्र(१७५१) वर्षे मासअश्विनवदि ७ सप्तम्यां भृगुवासरे श्रीरामपुरादुर्गे पण्डितश्रीरामविमलगणि-तच्छिष्यपण्डितज्ञानविमलगणि-शिष्यपं० मोहनविमलेन लिपीकृतम् ॥ यादृशं० ॥ अज्जा श्रीरतनाजीवाचनार्थम् ॥

[96]

अन्तः—व्याख्यानं कल्पसूत्रस्य नवमं सुगमं स्फुटम् ।
शिष्यार्थं पाठकाश्चक्रुः समयादिमसुन्दराः ॥१॥
श्रीशासनाधीश्वरवर्धमानो गुणैरनन्तैरतिवर्द्धमानः ।
यदीयतीर्थं स्व-खाब्ज-नेत्र (२१००) वर्षाणि यावद् विजयि प्रसिद्धम् ॥१॥
तदीयशिष्यो गणभृच्च पञ्चमः सुधर्म्मनामाऽस्य परम्परायाम् ।
बभूव शाखा किल वज्रनाम्नी चान्द्रं कुलं चन्द्रकुले च निर्मलम् ॥२॥
तद्गच्छे त्वभिधानतः खरतरे यैः स्तम्भनाधीश्वरो
भूमध्यात् प्रकटीकृतः पुनरपि स्नानोदकाद् रुग् गता ।
स्थानाङ्गादिनवाङ्गसूत्रविवृतिर्नव्याऽतिभव्या कृता
श्रीमन्तोऽभयदेवसूरिगुरवो जाता जगद्विश्रुताः ॥३॥
यो योगिनीभ्यो जगृहे ददौ च वरान् वरान् जाग्रदनेकविद्यः ।
पञ्चापि पीरान् स्ववशीचकार युगप्रधानो जिनदत्तसूरिः ॥४॥
पुनरपि यस्मिन् गच्छे बभूव जिनकुशलनाम सूरिवरः ।
यस्य स्तूपनिवेशाः सुयशःपुञ्जा इवाभान्ति ॥५॥
तत्पट्टानुक्रमतः श्रीमज्जिनचन्द्रसूरिनामानः ।
जाता युगप्रधाना मु(? द्धि)ल्लीपतिपातसाहिकृताः ॥६॥
अकबररञ्जनपूर्वं द्वादशसुबेषु सर्वदेशेषु ।
स्फुटतरममारिपटहः प्रवादितो यैश्च सूरिवरैः ॥७॥
यद्वारे किल कर्मचन्द्रसचिवः श्राद्धोऽभवद् दीप्तिमान्
येन श्रीगुरुराजनन्दिमहसि द्रव्यव्ययो निर्ममे ।
कोटेः पादयुजः शराद्रि(७५)समये दुर्भिक्षवेलाकुले
सत्राकारविधानतो बहुजनाः संजीविता येन च ॥८॥
यद्वारे पुनरत्र सोमजि-शिवाश्राद्धौ जगद्विश्रुतौ
याभ्यां राणपुरस्य रैवतगिरेः श्रीअर्बुदस्य स्फुटम् ।
गौडी-श्रीविमलाचलस्य च महान् सङ्घोऽनघः कारितो
गच्छे लम्भनिका कृता प्रतिपुरं रुक्मार्द्धमेकं पुरम् ॥९॥
तेषां श्रीजिनचन्द्राणां शिष्यः प्रथमतोऽभवत् ।
गणिः सकलचन्द्राख्यो इहडान्वयभूषणम् ॥१०॥

तच्छिष्यसमयसुन्दरसदुपाध्यायैर्विनिर्मिताऽध्यायैः ।
कल्पलतानामाऽयं ग्रन्थश्चक्रे प्रयत्नेन ॥११॥
प्रक्रिया-हैम-भाष्यादि पाठकैश्च विशोधिता(तम्) ।
हर्षनन्दनवादीन्द्रैश्चिन्तामणिविशारदैः ॥१२॥
कचित् सूत्र-वृत्योरनवबोधतो वा
किंचित् सूत्रपाठान्तरभ्रान्तिमत्वात् ।
कचिद् बुद्धिमान्द्याज्जिनाज्ञाविरुद्धं
मयाऽवाचि मिथ्याऽस्तु तद्दुःकृतं मे ॥१३॥
विषमं संस्कृतं भङ्क्त्वा सुगमं च मया कृतम् ।
सर्वत्र न कृतः सन्धिस्तत् सर्वं सुखबोधये ॥१४॥
सभासमक्षं व्याख्यानं कल्पसूत्रस्य दुष्करम् ।
केषाञ्चिदल्पबुद्धीनां बहूपायप्रलोकनात् ॥१५॥
कृत्वा तदनुकम्पां तां मया कल्पलता कृता ।
सुगमा तत एतस्यामेकस्यामेव कथ्यताम् ॥१६॥
लूणकर्णसरोग्रामे प्रारब्धा कर्तुमादरात् ।
वर्षमध्ये कृता पूर्णा मया चैषा रिणीपुरे ॥१७॥
राज्ये श्रीजिनराजसूरिसुगुरोर्बुद्ध्या जितस्वर्गुरो-
र्यद्भाग्यं भुवि लोकविस्मयकरं सौभाग्यमत्यद्भुतम् ।
कीर्तिस्तु प्रसरीसरीति जगति प्रौढप्रतापोदया-
ऽऽज्ञाऽत्युग्रतमाऽकृथाः तनुभृतां दारिद्र्यदुःखापहा ॥१८॥
श्रीमदभानवडे च पुण्डरगिरौ श्रीमेडतायां पुनः
श्रीपल्लीनगरे च लोद्रनगरे प्रौढा प्रतिष्ठा कृता ।
द्रव्यं भूरितरं व्ययीकृतमहो श्राद्धैर्महत्युत्सवे
राजन्ते जिनराजसूरिगुरवस्ते सांप्रतं भूतले ॥१९॥
युवराजे जिनसागरसूरिवरे विजयिनि प्रकृतिसौम्ये ।
यत्सौभाग्ययशोभिर्धवलीकृतभूतलं भाति ॥२०॥
तद्गुरूणां प्रसादेन मया कल्पलता कृता ।
कल्पसूत्रमिदं यावत् तावन्नन्दतु साऽपि हि ॥२१॥

इति समयसुन्दरोपाध्यायविरचिता कल्पलतानाम्नी श्रीकल्पसूत्रस्य टीकेयं समाप्ता ॥

[100]

अन्तः—संवत् १५६२ वासठावर्षे मण्डपगढमहादुर्गे वास्तव्यऊकेशवंश-साहा नासणभार्या नायकदे—पुत्रसाहहीराकेन भार्याहर्षमदेयुतेन श्रीज्ञानपञ्चम्युद्या-पनकृते श्रीमहानिशीथि(थ)सूत्रं लिखापितम् ॥ शुभं भवतु ॥

[101]

इति श्रीमहानिसीह समाप्तः । मिति संवत् १९७३ अषाडशुदि २ ने शनिवार । लि० लहिया जोशी श्रीवल्लभ श्रीनागोरमध्ये ।

शशि-वेदाङ्क-भू(१९४१)वर्षे गूर्जरे पुरि पट्टने ।
गच्छस्तपोऽभिधो येनालङ्कृतो भेदभेदिना ॥१॥
मुनेस्तस्य सदाचारचर्णस्य मोहनप्रभोः ।
शिष्यस्य पुस्तकं श्रीमद्धर्षनाम्नो मुनेरिदम् ॥२॥

[103]

अन्तः—इति श्रीयतिजीतकल्पवृत्तिर्जगत्प्रतीतश्रीतपागच्छाधिराजसुविहितशिरो-मणिभट्टारकप्रभुश्रीदेवसुन्दरसूरिशिष्यश्रीसाधुरत्नसूरिकृता ॥

वर्षे तर्क-शराब्धि-चन्द्र(१४५६)गणिते श्रीविक्रमार्काद् गते
गुर्वादेशवशाद् विलोक्य सकलाः कल्पादिशास्त्रावलीः ।
सूरिश्रीयुतदेवसुन्दरगुरोः शिष्याग्रणीरातनो—
देतां श्रीयतिजीतकल्पविवृतिं श्रीसाधुरत्नाह्वयः ॥१॥
प्राज्ञैरुद्देशतो वृत्तौ ग्रन्थमानं विनिश्चितम् ।
सहस्राः पञ्च श्लोकानां शतैः सप्तभिरन्विताः ॥२॥
ग्रन्था० श्लो० ५७०० ॥ श्रीः ॥

स्वस्ति श्रीप्रदवर्धमानभगवत्प्रासादविभ्राजिते
श्रीसंमेरपुरे सुरालयसमे प्राग्वाटवंशोत्तमः ।
आमूर्भूरियशा अभूत् सुमतिभूर्भूमिप्रभुप्रार्चित—
स्तज्जातान्वयपद्मलासुररविः श्रेष्ठी महानासडः ॥१॥
सन्मुखो मोखनामा नयविनयविधिः सूनुरासीत् तदीय—
स्तद्भ्राता वर्धमानः समजनि जनतासुखसौजन्यमान्यः ।
अन्यूनान्यायमार्गापनयरसिकस्तत्सुतश्चण्डसिंहः
सप्तासँस्तत्तनूजाः प्रथितगुणगणाः पेथडस्तेषु पूर्वः ॥२॥

नरसिंह रत्नसिंहौ चतुर्थमल्लस्ततस्तु मुञ्जालः ।
विक्रमसिंहो धर्मेण इत्येतेऽस्यानुजाः क्रमतः ॥३॥

संडेरकेऽणहिलपाटकपत्तनस्यासन्ने य एव निरमापयदुच्चचैत्यम् ।
स्वस्वैः स्वकीयकुलदैवतवीरसेनक्षेत्राधिराजसतताश्रितसंनिधानम् ॥४॥

वासावनीनेन समं च जाते कलौ कुतोऽस्थापयदेव हेतोः ।
वीजापुरक्षत्रियमुख्यवीजासौहार्दतो लोकवरार्द्धकारी ॥५॥

अत्र रीरीमयज्ञातनन्दनप्रतिमान्वितम् ।
यश्चैत्यं कारयामास लसत्तोरणराजितम् ॥६॥

योऽकारयत् सचिवपुङ्गववस्तुपालनिर्मापितेऽर्बुदगिरिस्थितनेमिचैत्ये ।
उद्धारमात्मन इव ब्रुडतो ह्यपारसंसारदुस्तरणवारिधिमध्य इद्धः ॥७॥

गोऽत्रैवाद्याप्तबिम्बं भीमसाधुविधित्सितम् ।
यं पित्तलमयं हैमदृढसंघिष्वकारयत् ॥८॥

चरमजिनवरेन्द्रस्फारमूर्तिं विधाप्य
गृहजिनवसतौ प्रातिष्ठिपत् शुद्धलग्ने ।
पुर उरुतरदेवौकःस्थितायां च तस्यां
समहमतिलघोः श्रीकर्णदेवस्य राज्ये ॥९॥

ख-रस-समय-सामे (१३६०) बन्धुभिः षड्भिरेव
सममिह सुविधीनां साधने सावधानः ।
विमलगिरिशिरःस्थादीश्वरे चोज्जयन्ते
यदुकुलतिलकाभं नेमिमानम्य मोदात् ॥१०॥

निजमनुजभवं यः सार्थकं स्राक् चकार
विहितगुरुसपर्यः पालयन् सांघपत्यम् ।
कलसकलकलासत्कौशली निष्कलङ्कः
पुनरपि षडकार्षीद् यो हि यात्रास्तथैव ॥११॥ त्रिभिः कुलकम् ॥

मुनि—मुनि-यक्ष (१३७७) मितेऽब्दे दुर्भिक्षविलक्षदीनजनलक्षान् ।
वीक्ष्यातुलधन्यानां दानात् स्वस्थांश्च यः कृतवान् ॥१२॥

समयश्रुतिफलमतुलं स्वगुरोर्योऽथैकदाऽवबुध्य सुधीः ।
सफलं विमलं सततं सदागमं श्रावय मम त्वम् ॥१३॥

इत्यर्थिवाँस्तस्मै गुरौ प्रवृत्तेऽकरोत् तथाकर्तुम् ।
तद्गमवीर-गौतमनामाऽर्चां रैरजतटङ्कैः ॥१४॥

तेनार्हणा धनेनाऽलेखयदासोक्तिकोशसुचतुष्कम् ।
सत्यादिसूरिवचनात् क्षेत्रनवक उप्तवान् वित्तम् ॥ १५॥ त्रिभिः कुलकम् ॥

तत्तनयः पद्माह्वस्तदुद्वहो लाडणस्तदङ्गभवः ।
अस्ति स्माहणसिंहस्तदङ्गजो मण्डलिकनामा ॥१६॥

श्रीरैवतार्बुदसुतीर्थमुखेषु चैत्योद्धारानकारयदनेकपुरेष्वनल्पैः ।
न्यायार्जितैर्धनभरैर्वरधर्मशालां यः सत्कृतो निखिलमण्डलमण्डलीकैः ॥१७॥

वसु-रस-भुवन(१४६७)प्रमिते वर्षे विक्रमनृपाद् विनिर्जितवान् ।
दुष्कालं समकालं बहुधान्नानां वितरणाद् यः ॥१८॥

वर्षेषु सप्त-सप्तत्यधिकचतुर्दशशतेषु (१४७७) यो यात्राम् ।
देवालयकलितां किल चक्रे शत्रुञ्जयाद्येषु ॥१९॥

श्रुतलेखन-संघार्चाप्रभृतीनि बहूनि पुण्यकार्याणि ।
योऽकार्षीद् विविधानि पूज्यजयानन्दसूरिगिरा ॥२०॥

व्यवहारिठाईआख्योऽभूद् दक्षस्तत्तनुज एव विजिताक्षः ।
वरमणकाईनाम्नी सत्त्ववती जन्यजनि तस्याः ॥२१॥

तत्कुक्ष्यनुपममानसकासारसितच्छदाख्यः पुत्राः ।
अभवन् श्रेष्ठाः पर्वत-डुंगर-नरबदसुनामानः ॥२२॥

तेष्वस्ति पर्वताख्यो लक्ष्मीकान्तः सहस्रवीरेण ।
पोहआप्रमुखकुटुम्बैः परीवृतो वंशशोभाकृत् ॥२३॥

डुंगरनामा द्वितीयः स्वचारुचातुर्यवर्यमेधावान् ।
पत्नीमंगादेवीरमणः काह्नाख्यसुतपक्षः ॥२४॥

स्वकारितार्हत्प्रतिमाप्रतिष्ठां विधाप्य तौ पर्वत-डुंगराभिधौ ।
वर्षे हि नन्देषु-तिथौ (१५५९) च चक्रतुः श्रीवाचकस्थापनसन्महोत्सवम् ॥

स्वर्तु-तिथि(१५६०)समायां यात्रां तौ चक्रतुः सुतीर्थेषु ।
जीरापल्लीपार्श्वार्बुदाचलाद्येषु सोल्लासम् ॥२६॥

गन्धारमन्दिरे तौ झलमलयुगलादिसमुदयोपेताः ।
श्रीकल्पपुस्तिका अपि दत्त्वाऽखिलसर्वशालासु ॥२७॥

कृतसंघसत्कृती चावाचयतां तौ च रूप्यनाणकयुग् ।
ददतुश्च सितापुञ्जं समस्ततन्नागरिकवणिजाम् ॥२८॥
कृतवन्ताविल्यादिविहितचतुर्थव्रतादरौ सुकृतम् ।
आगमगच्छेशश्रीविवेकरत्नाख्यगुरुवचनात् ॥२९॥
अथोत्तमौ पर्वत-काह्नानामकौ सार्थोद्यमौ सूरिपदप्रदापने ।
आकारितानां च समानधर्मिणां नानाविधस्थानसमागतानाम् ॥३०॥
पुंसां दुकूलादिकदानपूर्वकं समस्तसद्दर्शनसाधुपूजनात् ।
महामहं तेनतुरुत्तरं तौ पवित्रचित्तौ जिनधर्मवासितौ ॥३१॥ युग्मम् ॥
आगमगच्छबिभ्रतां सूरिजयानन्दसद्गुरोः क्रमतः ।
श्रीमद्विवेकरत्नप्रभसूरीणां सदुपदेशात् ॥३२॥
शशि-मुनि-तिथि(१५७१)मितवर्षे समग्रसिद्धान्तलेखनपराभ्याम् ।
व्यवहारिपर्वत-काह्नाभ्यां सुकृतरसिकाभ्याम् ॥३३॥
निजमानसमोदभरादलेखि निर्मलविचित्ररचनाढ्या ।
यतिजीतकल्पवृत्तिर्जिनोदितार्था जयतु सेयम् ॥३४॥ त्रिभिर्विशेषकम् ॥
[अन्यदीयहस्तेनोल्लिखितं यत्--]
संविग्नेनान्तिषदा तपगणपतिविजयसेनसूरीणाम् ।
श्रीरामविजयकृतिना चित्कोशे प्रतिरियं मुक्ता ॥१॥

[117]

अन्तः-- प्रत्याख्यानस्य निर्युक्तिः स्फुटार्था प्रकटीकृता ।
यथावृत्ति सुबोधैषा विद्वद्विमलकीर्तिभिः ॥१॥

प्रशस्तिः-अस्ति प्रशस्तरत्नौघः सदाचारपयोधरः ।
पुरुषोत्तमसंसेव्यश्च श्रीराजगणसागरः ॥१॥
यत्रासन्नधुनासमबलिना भूमण्डलस्वामिना
श्रीमद्वीरमते सतामभिमते स्पष्टं समुत्त्रासिते ।
जाग्रद्विष्णुकुमारवद्युगवरा रक्षाकराः प्रस्फुरत्-
पक्षाः श्रीजिनचन्द्रसूरिगुरवो मान्याः समैः सूरिभिः ॥२॥
तत्पट्टे गतसंकटे त्रिजगतीमाच्छादयन्तः स्वकै-
रच्छा तुच्छसमुच्छलत्त्रिपथगा डिण्डीरपिण्डोपमैः ।

शोभासुन्दरतोत्कटैर्गुणपटैः कुर्वन्ति राजन्वतीं
श्रीमच्छ्रीजिनसिंहसूरिगुरवस्तैर्थंकरीं संततिम् ॥३॥

अकबरनृपसंसल्लब्धवादीन्द्रनादाः
प्रहतकुमतलोकप्रोक्तयुक्तिप्रवादाः ।
खरतरविधिपक्षं पाठकाः साधुकीर्ति-
गणय उरुगुणौघैः शोभयामासुरत्र ॥४॥

तेषां शिष्याः प्रथमे प्रथमे सर्वेषु बुद्धिकार्येषु ।
विद्वद्विमलतिलकगणिनामानः सन्ति भूरिगुणाः ॥५॥

स्फीतालंकृतिरूपरीतिरमयुग्भाषागुणव्याकृति-
विद्याद्वयवधूपभोगरसिकाः शिष्याः द्वितीयाः पुनः ।
एते वाचकसाधुसुन्दर इति प्रख्यातगोत्राश्चिरं
जीयासुः कृतनव्यशास्त्ररचना सर्वाग्र्यसिद्धान्तिनः ॥६॥

शिष्यस्तयोर्विमलकीर्तिमुनिश्चकार बालावबोधमिह देव-गुरुप्रसादात ।
आलोक्य वृत्तिमखिलामपि हारिभद्रीं टीकामभिज्ञतनुबुद्धिजनोपकृत्यै ॥७॥

शास्त्रान्तराणि दृष्ट्वा न कं (?) चैव चारुलघुटीकाम् ।
व्याख्याताः प्रक्षिप्ता गाथाः काश्चित् क्वचित् स्थाने । ८॥

मान्द्यबुद्धेर्गौरवादर्थवृत्तेर्गभीरत्वादस्या[--]शास्त्रस्य कर्तुः ।
दोषश्चेत् स्याच्छोधनीयः सुधीभिर्हासः कार्यो नैव वार्ता विदित्वा ॥९॥

यदपि गदितमस्मिन् स्पष्टमावश्यकेऽर्थ-
वचनमधिकगाथाक्षेपकैर्दुर्गमार्थे ।
सदसदिति विचारज्ञैर्बुधैः शोधनीयं
नहि विदधति तन्द्रां सज्जना अन्यकार्ये ॥१०॥

[illegible]भराम्भोधि-रसेन्दुमान(१६७१)वर्षे सहर्षे वरपोषमासि ।
समाप्तो विहितस्तृतीयाशुद्धे दिने शान्तिजिनप्रसादात् ॥११॥

गगनशृङ्गारौ पुष्पदन्तौ विराजतः ।
[illegible]तामेष वाच्यमानो बुधैर्जनैः ॥१२॥

[illegible]निर्युक्तिसूत्राक्षरार्थः समाप्तः ॥

[130]

अन्तः—इति श्रीषडावश्यकसूत्रं टबार्थं संपूर्णम् ॥

प्रशस्तिः—वर्षे चन्द्र-जनार्दनप्रियतमापुत्राशुगर्षि-क्षमा(१७५१)—
मेये श्रीविजयादिमानगणभृद्राज्ये प्रदीपोत्सवे ।
प्राज्ञश्रीसुयशोऽन्वितस्य विजयस्याभुं षडावश्यका—
र्थोद्योगं कृतवान् जिनादिविजयोऽन्तेवासी मुख्यः सुधीः ॥१॥
सम्यक्त्वशुद्धव्रतधारिकायाः रूपाभिधायाः प्रचुराग्रहाच्च ।
आद्यां प्रतिं दर्शननामधेयः शिष्यो लिलेखार्कपुरे मुदाऽथ ॥२॥
इति श्रीषडावश्यकसूत्रं सटबार्थं संपूर्णं जातम् ॥

[132]

अन्तः—संवत् १८४५ वर्षे मासोत्तममासे चैत्रमासे शुक्लपक्षे तिथिसप्तमी-वारगुरौ श्रीसुमतिनाथप्रसादात् । श्रीरस्तु ।

सकलपण्डितशिरोमणिपण्डितश्री ५ श्रीवृद्धिविजयगणि-तत्शिष्यप्रवरपण्डितश्री ५-श्रीमाणिक्यविजयगणि—तत्शिष्यपं० मेघविजयगणिः तत्शिष्यपं० उत्तमविजयगणि-गुरुभाइ पं० केसरविजय तथा भाई मुक्तिविजयग०

संवत् १८४५ वर्षे चइत्रमासे शुक्लपक्षे तिथि ७ सातम वार गुरु श्रीसुमति-नाथप्रसादात् ॥

[133]

अन्तः—इति षड्विधावश्यकविधिः समाप्तेति भद्रम् ।
संवत् १४८३ वर्षे भाद्रपदशुदि ७ लिखितमिदम् ।
यस्य चित्तं द्रवीभूतं कृपया सर्वजन्तुषु ।
तस्य ज्ञानं च मोक्षं च किं जटा-भस्म-वल्कलैः ॥१॥
वृद्धनगरवासिन्या श्रा० हांसूनाम्न्या ऊकेशलोकोद्भवया लेखितम् । ग्रन्थाग्रम् २७२०॥

[148]

अन्तः—ग्रन्थाग्रम् १२७० । ए पुस्तक श्रीनवासेरके श्रावक बक्तावरम[ल]जी केशरीमलजी श्रीजेतारणभंडारसे जुनि पुस्तक सं० १६६१ की लखेली तेन उपर लखवायके श्री १००८ श्रीमोहनलालजी महाराजके शिष्य श्रीमत्तपागच्छा-धिराज श्रीजगत्प्रसिद्ध पंन्यासजी महाराज हरखमुनिजीकुं ए पुस्तक भेट किया है । पंन्यासजीका चतुर्मास श्रीनवासेरमां हुवा हे । ए वर्षमां मारवाडकी जात्रा

हुई छे। सं० १९७१ महा(माह)शुक्लपक्ष ६। लि० लहिया जोशी श्रीवल्लभः श्रीनागोरमध्ये। महाराजजीकी साथमां शिष्य २ मुनिराज नागोर आया था। मुनि श्रीचतुर मुनि श्रीक्षांती(ति)मुनिजी। अब काल दिवस श्रीबीकानेरकी तरफ विहार करणका भाव हे। शुभं भवतु। कल्याणमस्तु। श्रीनागोरमां जैन श्वेतांबर मंदिर ६ हे, जिसमें पूजा दिवस ८ सुधी बोत अच्छी तरहसे हुई। महाराजजी नागोरमां दिवस २५ रया। श्रावक लोगाकुं धर्मउपदेश दिया ॥श्री॥

[155]

अन्तः—इति पाक्षिकक्षामणटबार्थो लिखितः।

श्रीज्ञानविमलसूरिप्रसादमासाद्य वार्त्तिकं लिखितम्।
बुधदीपसागरशिशुना सुखसागरज्ञेन ॥१॥

यावच्चरमसमुद्रो यावन्नक्षत्रमण्डितो मेरुः।
यावच्च पुष्पदन्तौ रसपूर्णैस्तान् सुदृग् (?) ॥२॥

ग्रन्थाग्रमानमुदितं पञ्चसहस्रं चतुःशतीयुक्तम्।
गुण-मुनि-मुनि-विधु(१७७३)वर्षे माघे मासेऽष्टमीघस्रे ॥३॥

इति पाक्षिकसूत्र—टबार्थ—बालावबोध संपूर्णम्। लिखितं पं० कुशलकल्याणेन॥

सं० १८३७ मिति कार्तिककृष्णत्रयोदश्यां विक्रमपुरे वाच्यमानं चिरं जीयात्। श्रीरस्तु॥

[169]

अन्तः—सकलवाचकचक्रचूडामणी महोपाध्याय श्री १०८ श्रीसकलचन्द्रगणी तत्सुविनीतमहोपाध्याय श्री १०८ श्रीसूरचन्द्रगणी-तत्-शिष्य शत्रुञ्जयकरमोचनाद्यनेकसुकृतकृत्यततिकारकपातिसाह-श्रीजिहांगीरप्रतिबोधकमहोपाध्याय श्री १०५ श्रीभानुचन्द्रगणि-तत्शिष्य-सकलपण्डितशिरोमणी पं० श्रीभावचन्द्रगणीशिष्यमण्डली-मण्डनपण्डित श्री १०५ कनकचन्द्रगणी-तत्शिष्यपण्डित श्री पं० कपूरचन्द्रगणी-तत्शिष्यपण्डित श्री७ श्रीरविचन्द्रगणी-तत्शिष्यपण्डितश्रीमनोज्ञचन्द्रगणि-तत्शिष्यपण्डितश्रीपं० प्रेमचन्द्रगणि-तत्शिष्यपण्डितश्री पं० भुवनचन्द्रगणी-तत्शिष्यसुविनीतपं० लक्ष्मीचन्द्रगणिलिपीकृता श्रीपार्श्वनाथप्रसादात् राणाराजसिंघराज्ये श्रीदीर्घायुः॥

[171]

अन्तः—अथ प्रशस्तिमाह—

हरिभद्रकृता टीका वर्तते विषमा परम्।
मया तु शीघ्रबोधाय शिष्यार्थं सुगमा कृता ॥१॥

चन्द्रकुले श्रीखरतरगच्छे जिनचन्द्रसूरिनामानः ।
जाता युगप्रधानास्तच्छिष्यः सकलचन्द्रगणिः ॥२॥
तच्छिष्यसमयसुन्दरगणिना चक्रे च स्तम्भतीर्थपुरे ।
दशवैकालिकटीका शशि-निधि-शृङ्गार(१६९१)मितवर्षे ॥३॥
अर्थस्यानवबोधेन मतिमान्द्यान्मतिभ्रमया ।
जिनाज्ञाविपरीतं यत्तन्मिथ्यादुष्कृतं मम ॥४॥
ममोपरि कृपां कृत्वा शोधयन्तु बुधा इमाम् ।
परोपकरणे यस्मात् तत्परा उत्तमा नराः ॥५॥
टीकाकरणतः पुण्यं यन्मयोपार्जितं भवेत् ।
तेनाहमिदमिच्छामि बोधिरस्तु परत्र मे ॥६॥
शब्दार्थवृत्तिटीकायाः श्लोकमानमिदं स्मृतम् ।
सहस्रत्रयमग्रे च पुनः सार्धचतुःशतीम् ॥७॥

इति श्रीदशवैकालिकशब्दार्थवृत्तिः श्रीसमयसुन्दरोपाध्यायविरचिता समाप्तेति ॥

[177]

अन्तः— श्रीमत्तपागणनभोऽङ्गणभास्कराभ-श्रीदेवसुन्दरयुगोत्तमपादुकानाम् ।
शिष्यैर्जिनागमसुधाम्बुधिलीनचित्तैः श्रीज्ञानसागरगुरूत्तमनामधेयैः ॥
विधि-वह्नि-मनु(१४३१)मितेऽब्देऽवचूर्णिरेषा कृतौघनिर्युक्तेः ।
स्वपरोपकृतिकृते तद्वृत्तेरुपरि स्फुटा जयतात् ॥२॥

[184]

अन्तः — लिखितं पत्तननगरे ॥ इति श्रीजिनप्रभसूरिविरचिता महायमकमया चतुर्विंशतितीर्थङ्करस्तवनावचूरिः । यादृशं० ॥

लिखितागममाणिक्यमुनिना । श्रीतपागच्छनायकभट्टारकप्रभुसुविहिताचार्यशिरः-शेखरपरमपरमाराध्यश्रीरत्नशेखरसूरिपट्टपूर्वाचलप्रभाकरश्रीलक्ष्मीसागरसूरिशिष्यविबुधाव-तंस-पं० जिनहंसगणिविजयराज्ये ॥४॥

[190]

[प्रत्यन्तेऽन्यदीयहस्तेन लिखितमिदम्—]
संविग्नान्तिमदा तपगणपतिविजयसेनसूरीणाम् ।
श्रीरामविजयकृतिना चित्कोशे प्रतिरियं मुक्ता ॥१॥

[191]

अन्तः—इति श्रीमद्वृद्धपण्डितश्री५ श्रीदेवविजयगणिशिष्यपं० जयविजय-गणिविरचितायां श्रीशोभनस्तुतिवृत्तौ श्रीवर्धमानस्वामिनः व्याख्या ॥२५॥ इति शोभनस्तुतिवृत्तिः संपूर्णा । अथ प्रशस्तिः—

श्रीविजयसेनसूरीश्वरस्य राज्ये सुयौवराज्ये तु ।
श्रीविजयदेवसूरेरिन्दु-रसाब्धीन्दु(१७६१)मितवर्षे ॥१॥
समधीत्य वाचकेन्द्रश्रीमत्कल्याणविजयगणिशिष्यात् ।
श्रीधर्मविजयवाचकशिरोमणेः श्रुतनिधेः किञ्चित् ॥२॥
श्रीदेवविजयविदुषां शिष्योऽकृत शोभनस्तुतेर्वृत्तिम् ।
जयविजयः सुखबोधामल्पमतीनुपचिकीर्षुरिमाम् ॥३॥
श्रीशोभनस्तुतेर्वृत्तेः ग्रन्थाग्रं प्रतिपाद्यते ।
पञ्चाशत्त्रिशतीयुक्तं सहस्रद्वितयं मया ॥४॥

इति प्रशस्तिः । ग्रन्थाग्रम् २३५०, इति शोभनस्तुतिवृत्तिः ॥

[223]

अन्तः— श्रीलघुशान्तिस्तवटीका रचिता हर्षकीर्तिसूरिवरैः ।
श्रीभावसकलवचसा वचसा युग-देव-नृप(१६४२)वर्षे ॥१॥
बृहद्गच्छाब्धिशीतांशुमानदेवगुरोः कृतौ ।
चतुर्थे स्मरणे टीका कृता शान्तिस्तवाभिधे ॥२॥

श्रीमन्नागपुरीयतपागच्छेशश्रीहर्षकीर्तिसूरिविरचिता लघुशान्तिस्तवटीका संपूर्णा । राजनगरमध्ये चिन्तामणिप्रसादात् । पं० भावविजयगणिलिखितं चिरं जीयात्, संविज्ञपक्षीय पं० सागरीय.....वाचनार्थम् ॥

[227]

अन्तः—इति श्रीमन्नन्दिषेणमुनिप्रणीतः अजितशान्तिस्तवः संपूर्णः, लिखितोऽयं हंसरत्नेन स्ववाचनकृते संवत् १७५६ वर्षे पोषवदि ११ शुक्रे श्रीमद्भर्तृपुरमध्ये लिखितः ॥

लिखितेयं श्रीमत्तपगणतरणिप्रकल्पप्रभुश्रीराजविजयसूरीश्वरान्वयक्रमप्रचुराणां महोपाध्यायश्री ५ श्रीहर्षरत्नगणीनां शिष्यवराः गणेशश्रीलक्ष्मीरत्नगणयस्तच्छिष्याश्चारित्रचूडामणयः गणेशश्रीज्ञानरत्नजितस्तेषां चरणकमलसेविना हंसरत्नेन लिखितेयमजितशान्तिस्तवावचूरिः । प्राक्तनपुस्तकानुसारेण लिखिता तथापि सुधीजनैः स्व-परोपकाराय विशोध्या ॥

[240]

अन्तः—श्रीखरतरगच्छेशश्रीमज्जिनभद्रसूरिशिष्याणाम् ।
जीरापल्लीपार्श्वप्रभुलब्धवरप्रसादानाम् ॥१॥

श्रीग्यासदीनसाहेर्महासमालब्धवादिविजयानाम् ।
श्रीसिद्धान्तरुचिमहोपाध्यायानां विनयेन ॥२॥
श्रीसाधुसोमगणीशेनाक्लेशेनार्थप्रबोधिनी ।
श्रीवीरचरिते चक्रे वृत्तिश्चित्तप्रमोदिनी ॥३॥
मतिमान्द्यान्मोहाद् वा प्रमादतो वात्र किञ्चनापि मया ।
यत् सूत्रितमुत्सूत्रं वा तन्मिथ्यादुःकृतं मेऽस्तु ।
अत्रानागमिकं युक्तिरिक्तं वा यत् पदं क्वचित् ।
विद्वद्भिरभितः सद्भिस्तच्छोध्यं शुद्धबुद्धिभिः ॥५॥
जिनवल्लभसूरीन्द्रसूक्तिमौक्तिकपङ्क्तयः ।
दर्शिता वा सुदृष्टानां सुखग्राह्या भवन्त्विति ॥६॥
वाच्या चरित्रपञ्चकवृत्तिर्विहिता नवैक तिथि(१५१९)वर्षे ।
हर्षेण महर्षिगणैः प्रवाच्यमानश्चिरं जयतु ॥७॥

[245]

अन्तः—इति मन्नह जिणाणमाणं इति कुलकस्य वृत्तिर्नटीपद्रनगरे तपागच्छाधिराजश्रीहेमविमलसूरिविजयराज्ये पौषमासे शुक्लपक्षे प्रतिपद्दिने बुधे सकलानूचानशिरोवतंसस्वयशोनिर्जितराजहंसश्रीजिनहंससूरिशिष्यभुजिष्येण पं० राजमाणिक्यगणिना स्वपरोपकारविनोदाय सादरं लिखिता ।

यह ग्रंथ मुनिमहाराज श्रीमोहनलालजी महाराजना शिष्य पंन्यासजी श्रीहरखमुनिजी महाराजने अर्थे शहेर मुंबईमध्ये लालबागमां लिखी छे । शुभं भवतु ।

संवत् १९६६ ना महा वदी ७ गुरुवारे संपूर्णम् । लिपीकृत लहीया लक्ष्मीराम अम्बाराम, गढडावाला ॥

[249]

अन्तः—इति चतुश्चत्वारिंशद्वृत्तार्थः संपूर्णस्तत्संपूर्तौ संपूर्णेयं भक्तामरस्तववृत्तिः सप्रभावकथानकसंयुक्ता ।

गिरां गुम्फधात्री कवीन्द्रेषु वाणी चतुर्वर्णवर्ण्यश्चतुर्वर्णसंघः ।
गुरुश्चानुशास्ता सुधीः श्रीनृवर्गो जयेयुर्जगत्याममी आसमुद्रम् ॥१॥
श्रीचन्द्रगच्छेऽभयसूरिवंशे श्रीरुद्रपल्लीयगणाब्धिचन्द्राः ।
श्रीचन्द्रसूरिप्रवरा बभुस्ते यद्भ्रातरः श्रीविमलेन्दुसंज्ञाः ॥२॥
तत्पट्टे जिनभद्रसूरिगुरवः सल्लब्धिलब्धप्रभाः
सिद्धान्ताम्बुधिकुम्भसंभवनिभाः प्रेङ्खन्मनीषाः शुभाः ।

जातः श्रीगुणशेखराभिधगुरुस्तस्मात्तपोनिर्मल—
शीलः श्रीतिलको जगत्तिलक इत्यासीद् गुरुग्रामणीः ॥३॥

सद्गद्य-पद्यसुकविः कवितत्त्वधाता
चारित्रचारुकरुणाकरुणास्तकामः ।
तत्पट्टभूषणमणिर्गतदूषणोऽभूत्
श्रीमान् मुनीन्द्रगुणचन्द्रगुरुर्गरिष्ठः ॥४॥

संप्रत्यवनौ जयिनां निर्देशाद्भयदेवसूरीणाम् ।
गुणचन्द्रसूरिशिष्यो गुणाकरः सूरिरल्पमतिः ॥५॥

अद्भुतमहतीर्दधतीः बहुश्रुतमुखश्रुताः प्रभावकथाः ।
भक्तामरस्तवस्याभिनवां वृत्तिं व्यधादेनाम् ॥६॥

वर्षे षड्विंशाधिकचतुर्दशशती(१४२६)मिते च ।
वर्षर्तौ मासि नभस्ये रचिता सरस्वतीपत्तने वृत्तिः ॥७॥

यद् गदितमर्थकूटं यल्लक्षणशब्दतश्च दुष्टमिह ।
तत् साधुभिः सुधीभिः शोध्यं सद्यः प्रसद्य मयि ॥८॥

भक्तामरस्तवाक्षरवृत्तिं कृत्वा यदर्जितं सुकृतम् ।
तेनासौ सुकृतिजनो निरामयः स्यात् सदानन्दी ॥९॥

पञ्चदशशतान्यत्र द्वासप्ततिः समधिकानि गणितानि ।
शेषवर्णवृन्दान्यनुष्टुभां प्रायशः सन्ति ॥१०॥

ग्रन्थाग्रम् १५७२ । सकलाक्षरसंपूर्णश्रीभक्तामरस्तववृत्तिः समाप्ता ॥

[250]

अन्तः—श्रीमत्तपगणगगणाङ्गणदिनमणिहीरविजयसूरीणाम् ।
शिष्याणुना विरचिता वृत्तिरियं कनककुशलेन ॥१॥

नयन-शर-रसेन्दु(१६५२)मिते वर्षे वैराटनाम्नि वरनगरे ।
बालजनविबोधार्थं विजयदशम्यां हि ससमासा ॥२॥ युगलम् ।

श्लोकानां षट्शती षोडशोत्तरा समजायत ।
प्रत्यक्षरं गणनया वृत्तौ संख्या निगदिता ॥३॥

अङ्कतोऽपि ६१६ । सूत्रसहितवृत्तेः ग्रन्थाग्रम् ६९३॥

इति भक्तामरस्तोत्रवृत्तिः संपूर्णा ।

स्वस्ति श्रीसंवत् १७१२ वर्षे मधुमासे शुभ्रपक्षे १४ तिथौ तरणितनयवले श्रीमद्राजद्रङ्गे श्रीमत्तपगणगगनगभस्तिभट्टारकपुरन्दरप्रभुश्री ५ श्रीहीररत्नसूरिवरविनेय-वरिष्टपंन्यासश्री ५ श्रीलाभविजयगणि-तत्शिष्यग० प्रेमविजयेन लिपीचक्रे तत्-शिष्यमुनिश्रीधर्मविजयपठनाय श्रीराजनगरे लिपीकृतोऽयम् ।

[347]

अन्तः—संसारभस्मसारवृत्तिः संपूर्णा ।

शशि-वेदाङ्क-भूवर्षे (१९४१) गुर्जरे पुरि पट्टने ।
गच्छस्तपोऽभिधो येनालङ्कृतो भेदभेदिना ॥१॥
मुनेस्तस्य सदाचारचर्णस्य मोहनप्रभोः ।
शिष्यस्य पुस्तकं श्रीमद्धर्षनाम्नो मुनेरिदम् ॥२॥

सं०१९७१ फाल्गुणमासे शुक्लपक्षे ५ । लि० लहिया श्रीवल्लभ जोशी । श्रीनागोरमध्ये । शुभं भवतु ॥

[375]

अन्तः—नन्द-रस-सिद्धि-चन्द्रप्रमिते वत्सरे वरे ।

इयं व्याख्या गुणिग्राह्या चैत्रशुक्लाऽष्टमीतिथौ ॥१॥
दुर्गे जेशलमेरौ च कृतवाससुशोभिना ।
गणिनाऽमरचन्द्रेण वाचकेन सुसाधुना ॥२॥
तच्छिष्यजीवराजेन कृता व्याख्या मनोरमा ।
चैत्रशुक्लपूर्णिमायाः कान्तिरत्नसहायतः ॥३॥ —त्रिभिर्विशेषकम् ।

इति श्रीचैत्रशुक्लपूर्णिमाव्याख्यानं समाप्तं संपूर्णम् । ल० पं० लक्ष्मीवीजे ॥

[378]

अन्तः—स्वस्ति श्रीसंवत् १६३० वर्षे वैशाखवदिद्वादशीसोमवासरे श्रीमालवा-मध्ये श्रीसारंगपुरनगरे श्रीमत्तपागच्छे श्रीहीरविजयसूरिविज[य]राज्ये पं० श्री-देवविजयगणिभिर्लिखितं स्वश्रेयसे ॥ यादृशं० ॥

[401]

अन्तः—संवत् १८८६ रा वर्षे शाके १७५१ प्रवर्तमाने मासोत्तम-मासे माघमासे शुक्लपक्षे तिथौ द्वितीयादिवसे मङ्गलवारे लि० पं० जिनविजयेन लिपीकृतं जगतारणीमध्ये । सकलपण्डितशिरोमणि श्री श्री १०८ श्रीगोविन्दविजयजी तत्शिष्यमोहणविजय स्ववाचनार्थं श्रीऋषभदेवजीप्रसादात् ॥ यादृशं०॥

तरसतहुं तुम मिलनकुं, पल नही पावूं चैन ।
सजन दरस दीखावीयो, तव सुख पावै जीव ॥

[425]

अन्तः—स्वस्ति संवत् १५३८ वर्षे फाल्गुनवदि १० गुरौ । श्रीप्राग्वाटवंशे परी० वइजाभार्या लांपूसुतपरी० सहदे[व]सुश्रावकेण भार्या[लीलाइपुत्ररत्नपरी० अर्जुनभार्यासाधसहितेन श्रीउपदेशमालावृत्ति-कर्णिकाभिधा लिखिता, साधुभिर्वाच्यमाना चिरं विजयताम् ।]

[439]

श्रीवर्द्धमान इति चन्द्रकुलाम्बरार्कस्तस्माज्जिनेश्वरमुनीश्वर एव जज्ञे ।
रङ्गनवाङ्गविवृतिप्रथनप्रसिद्धमाहात्म्यभूरभयदेवगुरुस्ततश्च ॥१॥
सूरिर्बभूव जिनवल्लभनामधेयस्तत्पादपद्ममधुकृज्जिनशेखराख्यः ।
पद्मेन्दुबिन्दुनिभकीर्तिभरो बभूव सूरिस्ततो यतिपतिर्विजयेन्दुनामा ॥२॥
तस्माद् बभूवाभयदेवसूरिर्विध्वस्तविस्तारिकुवादिगर्वः ।
श्रीदेवभद्रोऽथ कृतोरुभद्रस्ततः प्रभानन्दमुनीश्वरश्च ॥३ ।
श्रीचन्द्रसूरिः सुगुरुस्तदीये पट्टावतंसप्रतिमोऽधुनाऽस्ति ।
अस्य द्वितीयस्तु धियाऽद्वितीयो जज्ञे मुनीन्द्रो विमलेन्दुनामा ॥४॥
आचार्यधुर्यत्वमप्रापिता श्रीः श्रीचन्द्रसूरिप्रवरैस्तु योगी ।
श्रीचारुचन्द्रो जिनभद्रसूरिर्गुणाम्बुधिः श्रीगुणशेखरश्च ॥५॥
एतैरेव वितीर्णोपाध्यायोपपदो मुनीश्वरोत्तंसैः ।
श्रीदेवभद्रयतिपतिशिष्यः श्रीश्रीतिलकनामा ॥६॥
गौतमपृच्छाप्रकरणविवरणमिदमल्पबुद्धिविभवोऽपि ।
भव्यजनोऽपकृतिकृतये कृतवानभ्यर्थितः कृतिभिः ॥७॥
छन्दोलक्षणमुख्यैर्दोषैर्यद् दूषितमस्ति किमपीह ।
तदखिलमपि मदनुग्रहबुद्ध्या शोध्यं सुधीमद्भिः ॥८॥
गगनतले परिखेलति यावज्ज्योतिष्कचक्रमखिलमपि ।
नन्द्याद् गौतमपृच्छाप्रकरणविवरणमिदं तावत् ॥९॥
कल्याणाचलभूर्विकासिसुमनःश्रेण्याऽभितः संश्रितः
सेव्यः सर्वसुपर्वभिः स्फुटतमोन्नत्यः प्रसत्त्यद्भुतः ।
सच्छायाचयचारुरुद्यदसमप्रङ्कृत्फलर्द्धिः पदं
नन्द्याद् वस्तदनल्पकल्पितमहश्रीसङ्घकल्पद्रुमः ॥१०॥

[444]

स्वस्ति संवत् १५७० वर्षे आषाढादि ७१ वर्षे माहमासे शुक्लपक्षे चतुर्थी-गुरौ श्रीऊकेशगच्छे श्रीसिद्धाचार्यसंताने पूज्यभ० श्रीसिद्धसूरि—श्रीकक्कसूरि- श्री-देवगुप्तसूरि-उपाध्यायश्रीमतिसागरान्वये पूज्यभ० श्रीधनवर्द्धनसूरि-श्रीदेवगुप्तसूरि-तत्पट्टोद्योतकारकप्रभुपुरन्दरपूज्यभट्टारकश्रीकीर्तिभूषणस्य श्रीसिद्धसूरिपट्टभृन्नाम-तच्छिष्यगुणमणिरत्नभूधरसदृशपण्डितश्रीकीर्तिकलशेन वाचनाय लिखिताऽस्ति ॥

प्रत्यक्षरं गणनया ग्रन्थमानं विनिश्चितम् ।
अनुष्टुभां सपदानां चतुस्त्रिंशच्छतानि च ॥४॥
बालानां बोधाय च वैरङ्गिकदानविजयवाचनाय ।
इषु-नेत्र-शैल-भूमिप्रमिते वर्षेऽत्र हर्षेण ॥५॥ चतुर्भिः कलापकम् ॥

लिखिता चेयं संवत् १७९८ ना वर्षे चैत्रवदि ६ दिने लिखितं मुनि-मोहनविजे(जयेन) चिरं जीवी ॥

[450]

अन्तः—तपगच्छजलधिचन्द्राः स्वाध्यायध्यानकरणनिस्तन्द्राः ।
भव्यजनानन्दकरा श्रीविजयानन्दसूरयोऽभूवन् ॥१॥
तत्पट्टोदयभूधरतरणिसमानतमस्तमोऽपहरे ।
श्रीविजयराजसुगुरौ सूरिगुणालङ्कृते विजयमाने ॥२॥
तत्सुसतीर्थ्यविबुधप्रत्याख्येन शान्तिविजयगणिनाम्ना ।
भवभावनायाः वार्तिकमलेखि शिशुनाऽऽशु मानविजयेन ॥३॥

[461, 462]

अन्तः—इति श्रीदेवचन्द्राचार्यविरचितं मूलशुद्धि-स्थानकविवरणं समाप्तमिति ।
आसीच्चन्द्रकुलाम्बरैकशशिनि श्रीपूर्णतल्लीयके
गच्छे दुर्धरशीलधारणसहैः संपूरिते संयतैः ।
निःसंबन्धविहारिहारिचरितश्चञ्चच्चरित्रः शुचिः
श्रीसूरिर्मलवर्जितोर्जितमतिश्चाम्रदेवाभिधः ॥१॥
तच्छिष्यः श्रीदत्तो गणिरभवत् सर्वसत्त्वसमचित्तः ।
नरनायकादिवित्तः सद्वृत्तो वित्तनिर्मुक्तः ॥२॥
सूरिस्ततोऽभूद् गुणरत्नसिन्धुः श्रीमान् यशोभद्र इतीन्द्रसंज्ञः ।
विद्वान् क्षितीशैर्नतपादपद्मः सन्नैष्ठिको निर्मलशीलधारी ॥३॥

नीरोगोऽपि विधानतो निजतनुः संलिख्य सर्वादरात्
सर्वाहारविवर्जनादनशनं कृत्वोज्जयन्ते गिरौ ।
कालेऽप्यत्र कलौ त्रयोदशदिनान्याश्चर्यहेतुर्जने
शस्यं पूर्वमुनीश्वरीयचरितं संदर्शयामास यः ॥४॥

तच्छिष्यो भूरिबुद्धिर्मुनिवरनिकरैः सेवितः सर्वकालं
सच्छास्त्रार्थप्रबन्धप्रवरवितरणाल्लब्धविद्वत्सु कीर्तिः ।
येनेदं स्थानकानां विरचितमनघं सूत्रमत्यन्तरम्यं
श्रीमत्प्रद्युम्नसूरिर्जितमदनभटोऽभूत् सतामग्रगामी ॥५॥

राद्धान्त-तर्क-साहित्य-शब्दशास्त्रविशारदः ।
निरालम्बविहारी च यः शमाम्बुमहोदधिः ॥६॥

सिद्धान्तदुर्गममहोदधिपारगामी कन्दर्पदर्पदलनोऽनघकीर्तियुक्तः ।
दान्तातिदुर्दममहर्द्धिकमहातुरङ्गः श्रीमाँस्ततः समभव....रिः ॥७॥

जगत्यपि कृताश्चर्यं सुराणामपि दुर्लभम् ।
निशाकरकराकारं चरित्रं यस्य राजते ॥८॥

तच्चरणरेणुकल्पस्तस्याणुदेवचन्द्रसंज्ञोऽभूत् ।
तच्छिष्यो गुरुभक्तस्तद्वदधिधिषणो विनिर्मुक्तः ॥९॥

किञ्च—

श्रीमदभयदेवाभिधसूरेर्यो लघुसहोदरः ।
स इव तस्यैकवृत्तिं चक्रे सूरिः श्रीदेवचन्द्राख्यः ॥१०॥

मतिविकलेनापि मया गुरुभक्तिप्रेरितेन रचितेयम् ।
तस्मादियं विशोध्या विद्वद्भिर्मयि कृपां कृत्वा ॥११॥

आवश्यकसत्पुस्तकलेखनजिनवन्दनार्च्चनोद्युक्तः ।
शय्यादानादिरतः समभूदिह वीहकस्येव ॥१२॥

तद्गुणगणानुयायी श्रीवत्सस्तत्सुतः समुत्पन्नः ।
तद्वसतावधिवसता रचितेयं स्तम्भतीर्थपुरे ॥१३॥

रस-युग-रुद्रै(११४६)र्वतैर्विक्रमसंवत्सरे समाप्तेयम् ।
फाल्गुनसितपञ्चम्यां गुरुवारे प्रथमनक्षत्रे ॥१४॥

अणहिल्लपाटकनगरे वृत्तिरियं शोधिता सुविद्वद्भिः ।
श्रीशीलभद्रप्रमुखैराचार्यैः शास्त्रतत्त्वज्ञैः ॥१५॥

साहाय्यमत्र विहितं निज—शोकचन्द्रगणिनाम्ना (?)।
प्रथमप्रतिमाऽऽलिखिता विश्रामविवर्जितेन भृशम् ॥१६॥
प्रत्यक्षरं निरूप्यास्या ग्रन्थमानं विनिश्चितम्।
अनुष्टुभां सहस्राणि संपूर्णानि त्रयोदश ॥१७॥

इति मूलशुद्धिप्रकरणटीका समाप्ता ॥

[464]

इति श्रीवर्धमानदेशनायां तपागच्छाधिराजश्रीसोमसुन्दरसूरि-श्रीमुनिसुन्दरसूरि-श्रीजयचन्द्रसूरि--श्रीरत्नशेखरसूरि-श्रीलक्ष्मीसागरसूरि--श्रीसुमतिसाधुसूरिपट्टालङ्करणपरम-गुरुश्रीहेमविमलसूरिविजयमानराज्ये पण्डितप्रकाण्डमण्डलीशिरोमणिपूज्यपं० श्रीसाधु-विजयगणिशिष्यपरमाणुपण्डितशुभवर्धनगणिप्रणीतायां तेतलीश्रावकप्रतिबोधो नाम दशम उल्लासः ॥

[469]

अन्तः—श्रीगुरुखरतरगच्छे श्रीमज्जिनचन्द्रसूरिराजानाम्।
राज्ये विराजमाने मुनि-वार्धि-रसेन्दु(१६४७)मितवर्षे ॥१॥
श्रीक्षेमराजाभिधपाठकानां शिष्या विशेषक्षमया क्षमाभाः।
क्षमाधरा क्षोभविनेयवृन्दाः श्रीवाचका कीर्तिमहीजकन्दाः ॥२॥
प्रमोदमाणिक्यसुनामधेयास्तेषां च अत्यद्भुतभागधेयाः।
शास्त्रार्थसर्वस्वकल्पपरिज्ञा जयन्ति सुज्ञा यशःसोमसंज्ञाः ॥३॥
तेषां शिष्येणेयं गुणविजयाख्येन निर्मिता व्याख्या।
काऽपि यथादेशमणुस्त्वरितं वैराग्यशतकस्य ॥४॥
यद् यद् प्राकृतसूत्रे न मिलति तत्रापि पूर्वसूरिगिरा।
प्रामाण्यं दैदाति विबुधाः सर्वं सत्यं समाधेये ॥५॥

[532]

बा० आदिः—श्रीगौतमाय नमः। श्रीजिनाय नमः। श्रीपार्श्वदेवो जयति ॥
ऐन्दवीयकलाशौक्लीं सहसौन्दर्यशालिनीम्।
सच्चित्कलामविकलां स्मरामोऽस्ततमोपहाम् ॥१॥
कर्मविपाकाविकृतः स्वसंविदे विश्ववन्द्यमभिवन्द्यम्।
वीरं कर्म्मविपाके टबार्थलिखनश्रमं कुर्वे ॥२॥
श्रीसन्तु सन्तु गन्तः सततमनया परात्महितनिरताः।
विमलीकुरुते कुवलयमुदितश्रीर्यशस्सोमः ॥३॥

केचित् परामर्शविधिकलाः विकलाः कलुकलायन्ते ।
तेभ्यो न कापि भीतिः सन्तः सन्तोषभाजश्चेत् ॥४॥

[535]

अन्तः-- इति श्रीमलयगिरिविरचिता सप्ततिटीका समाप्ता ॥ ग्रन्थाग्रम् ३७८० ॥ संवत् १४६४ वर्षे कार्तिकमासे शुक्लपक्षे द्वादश्यां तिथौ शुक्रदिने डूंगरपुरनगरे राउलश्रीप्रतापसिंहराज्ये लिखितं पञ्चाकेन । शुभं भवतु । नमो भगवत्यै श्रीसरस्वत्यै ॥

अस्मिन् भारतभूतलेऽतिविपुले सन्यायधर्मान्वितः
श्रीमान् गूर्जरमञ्जितोऽस्ति विषयः श्रीजैनहर्म्यैर्वृतः ।
अन्तस्तद्गगनाग्रलिट्ध्वजपटभ्राजिष्णुचैत्यत्रयी
प्राप्तप्रौढिभरोऽस्ति देलउलिकाग्रामः सुखैरव्ययी ॥१॥
वापी-कूपारामैरभिरामो राजते च यो ग्रामः ।
पुण्ड्रं नु भूपुरन्ध्र्या हृदहृदिनीपल्वलैः कलितः ॥२॥
प्राग्वाटवंशाम्बुजबोधभानू रत्नाह्वयः श्रेष्ठिवरो वदान्यः ।
तत्राभवच्छ्राद्धकुलावतंसः श्रीधर्मकर्माचरणानुकूलः ॥३॥
रत्नादेवी तस्य जायाऽजनिष्ट श्रेष्ठा शश्वत् शीलनाम्ना गुणेन ।
अर्हत्पूजा-सद्गुरूपास्तिलीना हीना दोषैः क्षान्तिपीयूषपीना ॥४॥
देवसिंह इति सिंहमहौजास्तत्सुतः समजनिष्ट सुतेजाः ।
प्रेयसी समभवत् कुलशीला तस्य धर्मकलिता किल देल्हूः ॥५॥
तयोस्तनूजत्रितयीत्रिनेत्रत्रयीव या त्रिजगत्प्रतीता ।
अभूज्जगत्सिंह इतीहमुख्यस्तेजाह्वयः पातलसंज्ञितश्च ॥६॥

इतश्च--

तत्रैव देपाल इति प्रसिद्धः श्रेष्ठीश्वरोऽभूद् रमया समृद्धः ।
तस्याभवद् रूपलनाम जाया जाउः सुताऽऽसीच्च तयोरमाया ॥७॥
अर्हद्गुरूपासन एकतानः शश्वत्स्फुरद्विश्वयशःप्रतानः ।
तेषूपयेमे जगसिंहनामा तां शुद्धशीलादिगुणां च जाऊं ॥८॥
एवं कालक्रमेणाजनिषत तनयाः षट् तयोर्धर्मनिष्ठाः
सद्वृत्ता वित्तवित्ता जगति सुविदिता न्यायवृत्त्या च गुर्व्या ।
गाम्भीर्यौदार्यवर्या विरतिरतिकृतो भाग्यसौभाग्यभाजः
सम्यक् श्रीदेव गुर्वाद्यमलगुरुलमद्भक्तिसुव्यक्तचित्ताः ॥९॥

सप्ताऽपि धातवो येषामर्हद्धर्माधिवासिताः ।
विरता उग्रपाप्मभ्यो रता सद्धर्मकर्मणि ॥१०॥

श्रीसंघकृत्यकरणैकनिबद्धकक्षाः श्राद्धैकविंशतिगुणा वनदक्षमुख्याः ।
सम्यक्त्वमुख्यरवि(१२)संख्यव्रतैः परीताः सत्पात्रदाननिरतत्वगुणप्रतीताः ।११।

क्ष्मापाललक्षपतिवासितनव्यरम्य-श्रीजाउराह्वयपुरे सकलाकराढ्ये ।
यैः करितं गगनमण्डललेहिकुम्भं श्रीजैनहर्म्यमतुलद्रविणव्ययेन ॥१२॥

यैर्नायकत्वेन जिनेन्द्रशान्तिबिम्बं स्वशान्त्यै शिवकारिहारि ।
नागह्रदे तीर्थवरेऽतिवित्ते सीहावसत्यां विनिवेशितं च ॥१३॥

शत्रुञ्जये श्रीमति चोर्जयन्ते श्रीचित्रकूटे फलवर्द्धिकायाम् ।
सोपारके सत्पुरि जीरपल्ल्यां श्रीतीर्थयात्रा असृजन्मुदा ये ॥१४॥

देवकुलपाटकपुरे श्रीवृषभोत्तुङ्गभवनकरणार्थम् ।
यैरर्पिता स्वगृहभूबहुतरसद्द्रव्यभागोऽपि ॥१५।

एवंविधाः षडपि ये तनया जगत्यां राजन्ति वर्षधरभूधरषट्तयीव ।
सद्वर्णकान्तिकलिताः कमलालयाश्च क्ष्माभृत्कुलोन्नतिभृतः सुमनोविलासाः ।१६।

तेष्वाद्यः केल्हाह्वः साधुवरः समजनिष्ट नृपमान्यः ।
तस्याभूतां पत्न्यौ झोल्ह-पूजीति विख्याते ॥१७॥

पौरस्त्यायास्तनूजन्मा वीझाह्वो विनयान्वितः ।
द्वितीयस्या इयं जाता सत्पुत्रत्रितयी क्रमात् ॥१८॥

आद्यो जेसाह्वयः पद्मसिंहाख्यो द्वितीयः पुनः ।
तृतीयो नरपालस्तु दयापालनलालसः ॥१९॥

यस्यावलोक्य विरतिं प्रवरां विशुद्ध-
सम्यक्त्वपालनकलां च दयालुतां च ।
आनन्द-शङ्ख शतकोत्तम-कामदेव-
सन्नामधेयमधिहृत्सुधियः स्मरन्ति । २०॥

सगुणैरद्वितीयोऽपि द्वितीयः समजायत ।
लोकैपूर्णोऽपि तच्चित्रं विश्रुतः कटुकाख्यया ॥२१॥

तस्याभवद् रूपकलानिधानं वारूः सुपत्नी तनयौ तयोः स्तः ।
आद्यः कलावान् खलु देवराजो द्वितीयकः सद्गुणभूर्धनाह्वः ॥२२॥

प्रासादशालाऽतुलकार्यसारा निर्माण-निर्मापणनित्यनिष्ठः ।
यो राजतेऽर्हत्प्रतिमाद्यनेकसत्कृत्यकारापणबद्धलक्षः ॥२३॥
उपमानानि क्लृप्तानि प्रतिवस्तु स्वयंभुवा ।
तेषु वीतोपमानः स्याद् य एवैकस्तु भूतले ॥२४॥
किं रोहणः सकलसद्गुणरत्नराशेः
कोशः कथं सुकृतसच्छ्रिय एष किंवा ।
आलानको विरतिजात्यकरेणुकायाः
संदेग्धि यं च समवेक्ष्य जनो हृदेति ॥२५॥
श्रीमद्युगादिप्रासादेऽन्तर्देवकुलिकं मुदा ।
येन सीमन्धरोऽस्थापि स हेमाह्वस्तृतीयकः ॥२६॥
दयिता तस्य सच्छीला हीरादेवीति विश्रुता ।
देवदत्तस्तयोः पुत्रश्चक्रुश्चासीत् तनूद्भवा ॥२७॥
तपोगणे श्रीमती तत्तनूजा जग्राह दीक्षां महता महेन ।
विशुद्धरत्नत्रितया च रत्नचूलेति नाम्ना यतिनी विनीता ॥२८॥
तुर्यो मालाभिधानः सकलगुणनिधिस्तस्य शाणीति पत्नी
जैत्राह्वः पञ्चमोऽभूत् खलु जयतलदेस्तस्य कान्ता ह्यकोपा ।
षष्ठः शिष्टो गरिम्ना जगति चरणसीस्तस्य जाया ललीति
शार्दूलस्तत्सुतोऽमो जिनगुरुचरणाम्भोजसच्चञ्चरीकाः ॥२९॥
रूडीति नाम्ना भगिनी च तेषां प्राणप्रियैका समभूत् समेषाम् ।
तपःपरिष्कारविलासिदेहा विशुद्धशीला सुकृता हतेहा ॥३०॥
इतश्च—
देवकुलपाटकाख्यं नगरं नगराजि राजितं पृथ्व्याम् ।
विदितं नगरपरिकलितं तिलकं सन्मेदपाटभुवः ॥३१॥
परःशतैः श्राद्धकुलैरुपेतमुत्तुङ्गजैनालयराजिमध्यम् ।
श्रीलक्षराणाभिधभूपभूतप्रभूतसद्वृद्धि विराजते यत् ॥३२॥
किंवाऽमरावती पृथ्व्यामवतीर्णाऽलका किमु ।
संशेते वीक्ष्य लोको यद रामणीयकमद्भुतम् ॥३३॥
श्रीमत्तपोगणनभोऽङ्गणभास्करस्य श्रीदेवसुन्दरगुरोर्वरदेशनायाः ।
स्वान्यावबोध.....

[536]

बा० आदिः—प्रणिपत्य पार्श्वदेवं स्मृत्वा स्वगुरुं गिरं च भागवतीम्।
सप्ततिकाया व्याख्यां कुर्वेऽहं बालबोधार्थम् ॥१॥
मत्तोऽपि मन्दमतयो न जानते ये हि चूर्णिटीकोक्तिः।
तद्बोधानुग्रहधीविषयो यन्नः शुभाय तत् ॥२॥
केचित् परात्मसंविधिविकलाकलाः कलौ खलायन्ते।
तेभ्योऽपि न काऽपि भीतिः सन्तः सन्तोषभाजश्चेत् ॥३॥
श्रीहर्षसोमविबुधान् सुयशस्सोमाभिधानान् कविश्रेष्ठान्।
नत्वा सप्ततिकायाः लिखामि जनभाषया व्याख्याम् ॥४॥

बा० अन्तः—श्रीचन्द्रगच्छाम्बरपूर्णचन्द्रो मेधाविधिष्ण्योपगतो वितन्द्रः।
प्राप्तप्रतिष्ठो यवनेशसत्कः सूरीश्वरोऽभूद् विजयादिसेनः ॥१॥
तत्पट्टपूर्वाचलचित्रभानुः कुपक्षतार्क्षोल्बणचित्रभानुः।
महातपाख्यातिधरो धरायां जीयात् स सूरिर्विजयादिदेवः ॥२॥
तत्पट्टनाट्यप्रियमौलिनिष्ठोऽभूत् सूरिराजा विजयादिसिंहः।
यद्गोभरस्पृक्प्रशमामृतोपमान् दुदुश्च तच्चित्तविधूपलोमे ॥३॥
तदीयगच्छाम्बुजराजहंसः सद्विज्ञसंविज्ञजनावतंसः।
विध्वस्तदोषः कृतरोषशोषोऽभवद् यशस्सोमगुरुर्यशस्वी ॥४॥
किं वर्ण्यतेऽन्यद् गुणगौरवं गिराम्भोधेरमोघाचरणस्य तस्य।
यदीयविद्याधनतर्ज्जितोत्तरा किं सेवते देवगुरुर्न नाकम्? ॥५॥
जज्ञे यशस्तद्गुरुहस्तसिद्धियोगाज्जडोऽपीदृशशास्त्रवेत्ता।
किं योगिखाणिरिति चूर्णियोगाल्लोहं च लोहोत्तमतां दधाति? ॥६॥
संवद्विपूर्णार्णव-चन्द्र(१७१५)वर्षे लिलेख वृत्तिं जनभाषयेमाम्।
चतुःसहस्रं किल ग्रन्थसंख्या श्लोकस्य मानं कथितं च षष्टिः ॥७॥

इति श्रीसप्ततिकाकर्मग्रन्थबालावबोधः समाप्तः।

ग्रन्थसंख्या ४५६१ समाप्तौ च समाप्तोऽयं कर्मग्रन्थाभिधानो ग्रन्थः।

संवत् १८४१ वर्षे शाके १७०६ प्रवर्त्तमाने मासोत्तममासे चैत्रमासे कृष्णपक्षे षष्ठीतिथौ रविवासरे श्रीपत्तननगरे श्रीपार्श्वसरजिनराजप्रासादे श्रेयो भवतु ॥

[548]

अन्तः—इति सकलसूरिपुरन्दरपरमगुरुतपागच्छाधिराजभट्टारकश्री५ श्रीहीरविजयसूरिप्रसादीकृतप्रश्नोत्तरसमुच्चये तत्शिष्यपण्डितकीर्तिविजयगणिसमुच्चिते चतुर्थः प्रकाशः, समाप्तोऽयं प्रश्नोत्तरसमुच्चयग्रन्थः । शोधितश्च संवत् १६५३ वर्षे पत्तननगरे वैशाखशुक्लचतुर्थ्यां बुधवासरे मृगशीर्षनक्षत्रे तपागच्छाधिराजश्रीविजयसेनसूरीश्वराणां निदेशात् महोपाध्यायश्रीसोमविजयगणि-पं० कल्याणकुशलगणि-पं० लब्धिसागरगणि—पं० लाभविजयगणिभिरिति । आचन्द्रार्कं चिरं नन्दतात् । श्रीः स्तात् श्रीसंघस्य ।

संवत् १६९९ वर्षे आसोशुदिविजयादशमीदिने उसमांपुरवास्तव्यप्राग्वाटज्ञातीयवृद्धशाखायां साहश्रीचन्दभार्या वल्हादेसुतसाहऋषभदासेन लिखितः परोपकाराय । श्रीमत्तपागच्छे भट्टारकश्री ५ श्रीविजयाणन्दसूरीश्वरराज्ये पं० श्रीदेवविजयगणिशिष्य पं० मानविजयगणिवाचनकृते । शुभं भवतु लेखक-पाठकयोः ॥

मुनेस्तस्य सदाचारवर्णस्य मोहनप्रभोः ।
शिष्यस्य पुस्तकं श्रीमद्धर्षनाम्नो मुनेरिदम् ॥२॥
लि० श्रीफलोधी मारवाडमध्ये ॥

[550]

अन्तः— दुर्वारविघ्नोत्कटवारणाय श्रीसिद्धचक्राय सुरद्रुमाय ।
क्षमादिकल्याणसुपाठकाय प्रज्ञाप्रदात्रे च नमो नमोऽस्तु ॥१॥
वेदाष्ट-युग्मान्वित-भू(१८८४) मितेऽब्दे सत्कार्तिके शुद्धदले च घस्रे ।
सुचन्द्रवारे द्वितीयातिथौ द्रागायुष्ययोगे प्रवरे सुरम्ये ॥२॥
चान्द्रे कुले श्रीजिनभक्तिसूरेर्वरान्वये वाचकरामचन्द्र—
प्रभोरुमेदाख्यधरेण वर्यशिष्येण दृब्धं शतकं मनोज्ञम् ॥३॥
यः कोऽपि शब्दादिकदोषयुक्तो यातोऽत्र ग्रन्थे विदुषा स शोध्यः ।
प्रमाददोषात् प्रतिकूलवाक्याद् ममातिसह्यं च सुदोषजालम् ॥४॥
संविग्नधर्मनन्दस्य मुनेः प्रार्थनया कृतम् ।
नाम्ना हि सारशतकं मया जयपुरे वरे ॥५॥
इति सारशतकं संपूर्णम् ॥

सं० १९७२ का आसोजवदि १० लि० लहिया श्रीवल्लभजोशी ।

शशि—वेदाङ्क—भू (१९४१)वर्षे गूर्जरे पुरि पट्टने ।
गच्छस्तपोऽभिधो येनालंकृतो भेदभेदिना ॥१॥

[552]

अन्तः— श्रीमान् जगद्गुरुरिति प्रथितो धरैकवीरः स हीरविजयाभिधसूरिरासीत् ।
श्रीमत्तपागणपयोरुहभानुमाली यः प्रत्यबोधयदकब्बरभूमिपालम् ॥१॥
तत्पट्टभूषणमणिर्गणिलक्ष्मिकान्तः सूरिर्बभौ विजयसेनविभुः प्रतीतः ।
निश्शेषवाङ्मयमहोदधिपारदृश्वा विश्वोपकारकरणैकनिबद्धकक्षः ॥२॥
तत्पट्टे सुविहितमुनिसंघेनाराधितो जगत्पूज्यः ।
निश्शेषसूरितिलकं सूरिर्विजयतिलकगुरुरासीत् ॥३ ।
तत्पट्टे विजयन्ते युगप्रधानोपमानमहिमानः ।
विजयानन्दनिदानं श्रीविजयानन्दसूरीन्द्राः ॥४॥
तेषां सुविहितमुनिगणसितच्छदा सेवितांह्रिकमलानाम् ।
सुगुरूणामादेशान्निरुपमसौभाग्यभाग्याणाम् ॥५॥

किञ्च,

श्रीविजयदानसूरीश्वरशिष्याः ख्यातं चारुकीर्तिभराः ।
श्रीविमलहर्षवाचकमुख्या आसन् जगन्मान्याः ॥६॥
तच्छिष्यमौलिमणयो निजधिषणापाटवानुकृतधिषणाः ।
श्रीमुनिविमलाह्वाना वाचकतिग्मांशवोऽभूवन् ॥७॥
एषां स्वीयगुरूणां प्रसादश्चापि शास्त्रवर्णानाम् ।
अनुसन्धानं कृत्वाऽलिखदित्थं भावविजयगणिः ॥८॥
निधि-मुनि-रस-शशि(१६७९)सिमन्तवर्षे श्रीविक्रमार्कभूमिधरात् ।
श्रीकर्पटवाणिज्ये नगरेऽभूदयमुपक्रमः ॥९॥
अनेकशास्त्रार्थविचारसंग्रहे निरस्तदुर्बुद्धिकदाग्रहग्रहे ।
यद्दूषणं स्यात् तदपास्तविग्रहैः संशोधनीयं विबुधैः सदाग्रहैः ॥१०॥
श्रीशंखेश्वरपार्श्वनाथमहिमप्रत्यूषलब्धोदय-
श्चञ्चच्छास्त्रविचारचारुकिरणो निश्शेषदोषापहः ।
श्रीमत्पूर्वमुनीन्द्रवाक्यकमलश्रेणीं समुल्लासयत्
सच्चक्रप्रणयिग्रहेशवदसौ ग्रन्थश्चिरं नन्दतात् ॥११॥

संवत् १९२९ वर्षे श्रावणशुदि ५ शुक्रे लिखा० पेटलादनगरे ॥

[556]

अन्तः—वाचनाचार्यप्रबोधचन्द्रगणिविरचिता सन्देहदोलावलीवृत्तिः समाप्ता ॥
चान्द्रे कुलेऽतुलबुधौजसि वर्द्धमानसूरिर्बभूव सुमुनिस्थितिकेलिधाम ।
ध्यानप्रकर्षमहिमेक्षितसूरिमन्त्रेशः साधुधर्म इव योग इवाथ मूर्त्तः ॥१॥

तत्पट्टेऽत्र जिनेश्वरो गुरुरभूच्चौलुक्यचूडामणि-
श्रीमद्दुर्लभराजराजसमितौ यस्योग्रया हृष्कया ।
कम्प्राणां प्रतिवादिनां प्रविगलत्स्वेदोदबिन्दुच्छला-
न्निःसमुस्त्वरितं विषादत इवाङ्गेभ्यः सुविद्यालवाः ॥२॥

ध्वान्तं हतं खलु जगत्यपि हन्यतां ना-
दर्श्यन्तरं सदसतोरपि दर्श्यतां नः ।
उष्णद्युतस्तदपि भानुमता न लेभे
यस्योपमाऽभवदसौ जिनचन्द्रसूरिः ॥३॥

ततोऽनु जज्ञेऽभयदेवसूरिर्वृत्तिः कृता येन नवा नवाङ्ग्याः ।
इतीव सेव्येयमभूद् ययेत्थं स्वसेविनां निर्वृतिदायिका च ॥४॥

विद्यामाभवतात् कुला जननिवाग्देवि त्वमाश्वासयै-
ता धातस्त्वमिमां प्रबोधय गिरं ब्रह्मन्! स्वयं मा मुहः ।
आसीनोऽभयदेवसूरिमुनिराट्पट्टे जगद्वल्लभः
सूरिः श्रीजिनवल्लभः स्वरसतः सिद्धं च एवेप्सितम् ॥५॥

तत्पट्टे जिनदत्तसूरिरभवन्मार्तण्डचण्डप्रभौ
यस्मिन् विष्टपशर्मणे तत इतः स्वच्छन्दतः भ्राम्यति ।
तज्ज्योतिर्गलहस्तिताघनतमःपिण्डा इव द्विड्गजा
जग्मुर्दिक्षु विदिक्षु मङ्क्ष्वभिभवं वक्तुं नु दिग्दन्तिनाम् ॥६॥

कन्दर्पेऽपि न रूपमीदृशमिदं तेजो न सूर्येऽप्यसौ
वीणायामपि न ध्वनिर्न च कला चन्द्रेऽपि चैवंविधा ।
धात्रा तत् कथमेष ईदृगजनीत्याशङ्कि लोकैश्चिराद्
यं दृष्ट्वा जिनचन्द्रसूरिरथ सोऽभूत् तत्पदद्योतकः ॥७॥

येषां गीर्वाणवाणीलहरिभिरभितः प्रेर्यमाणाऽखिलाऽपि
श्रीपृथ्वीराजपृथ्वीपतिसमितिरिहाश्चर्यसिन्धौ ममज्ज ।
चित्रं तत्रापि शत्रोर्वपुषि ववृधिरे तर्षमालिन्यतापाः
पापानां किमेतज्जिनपतिगुरवस्तेऽथ पट्टे बभूवुः ॥८॥

अथ जिनेश्वरसूरिरिदं पदं सदमलंकुरुतेऽर्थ इवाद्भुतः ।
यदुपदेशगिरं विबुधाः सुधालहरितोऽप्यधिकं बहु मन्वते ॥९॥

ज्वलति परमज्योतिर्दीपो यदेष दिवानिशं
हृदयसदने चक्रे वागीश्वरीप्रतिचारिकः ।
तत इह हि महार्थानां कोटीर्विजृम्भत इत्यहो!
स्फुरति हृदि मे यन्नो लिङ्गं विना निजलिङ्गि नो ॥१०॥
तस्यास्त्वन्तेवासी प्रबोधचन्द्रगणिवाचनाचार्यः ।
गुरुकुलसेवाहेवाकविदितशिक्षाद्वयरहस्यः ॥११॥
सुविहितसामाचार्यां लक्षण-साहित्यविद्ययोर्यस्य ।
मूर्तो गुरुरिव गुरुरजनि वाचनाचार्यपद्मदेवगणिः ॥१२॥
जिनचन्द्रसूरिशिष्यः समजनि गुणभद्रवाचनाचार्यः ।
जङ्गमतीर्थः कातन्त्रपञ्जिकादौ गुरुर्यस्य ॥१३॥
कदापि न च यैक्षितामपि कथामिवान्वीक्षिकीं
यथा कविविवक्षितं सदसि यो बतार्थापयत् ।
स यस्य विनयोदधेर्विषमतर्कविद्यार्णवाऽ-
वगाहनविधावभूद् विजयदेवसूरिर्गुरुः ॥१४॥
नृपसमितिविजितविविधप्रतिवादिवितीर्णजयपताकोद्याः ।
जिनपालोपाध्यायाः आसन् यस्यागमे गुरवः ॥१५॥
दीक्षाचार्यजिनेश्वरसूरिवचःसिद्धमन्त्रमासाद्य ।
सुधाववोधनार्थं तेनेयं विरचिता वृत्तिः ॥१६॥
प्रथमं लक्ष्मीतिलकोपाध्यायैः सूक्ष्मदर्शिमतिमद्भिः ।
जिनरत्नाचार्यैश्च चन्द्रतिलकैरुपाध्यायैः ॥१७॥
स्व-परसमयतत्त्वज्ञैरतिवत्सलमानसैर्महाकविभिः ।
प्रतिभाजितसुरगुरुभिस्त्रिभिरपि समशोधि विधिनाऽसौ ॥१८॥ युग्मम् ॥
अन्यैरपि विद्वद्भिः संविग्नैरत्र सूत्रबाह्यं यत् ।
संभाव्यते तदखिलं मिथो विचार्यैव संशोध्यम् ॥१९॥
अत्रार्थेऽहं तेषामञ्जलिबन्धं करोमि बहुमानात् ।
मिलितैरपि पूज्यानां ग्रन्थे महिमा यतो जन्या ॥२०॥
मा गां मार्गसमानताभ्रमभवद्व्यामूढतात्रोटिनी
तत्त्वज्ञानकरी कुमार्गगतसद्दोषव्रजाविष्करी ।
एषा निर्म्मलधर्मकर्मजननी संदेहदोलावली-
वृत्तिर्नन्दतु तापजाड्यमथनी भग्नीव चन्द्रार्कीया ॥२१॥

अस्याः सूत्रयुतायाः वृत्तेः प्रत्यक्षरं विमृश्य कृतम् ।
ग्रन्थाग्रं सप्ताधिकचत्वारिंशत् शतानि सार्द्धानि ॥२२॥
विक्रमवर्षे वारकरशिखिरूप(१३२७)मिते मधोः प्रथमपक्षे ।
पञ्चम्यां प्रह्लादनपुरनगरेऽसौ समर्थिता सोमे ॥२३॥
श्लोकमानं ग्रन्थाग्रम् ४७५० श्रीरस्तु । लेखक-पाठकयोः शुभं भवतु ।

[568]

अन्तः—इति श्रीमुनिचन्द्रसूरिविरचितेऽनेकान्तजयपताकोद्द्योतदीपिकावृत्तिटिप्पनके मुक्तिवादाधिकारः समाप्तः । तत्समाप्तौ समाप्तमिदं निजविनेयरामचन्द्रकृतात्यन्तान्तरङ्गसाहाय्येन श्रीमदनेकान्तजयपताकावृत्तिटिप्पणकम् इति ।

कष्टो ग्रन्थो मतिरनिपुणा संप्रदायो न तादृक्
शास्त्रं तन्त्रान्तरमतमतं सन्निधौ नो तथापि ।
स्वस्य स्मृत्यै परहितकृते चात्मबोधानुरूपं
मागामागःपरमहमिह तथा व्यापृतश्चित्तशुद्ध्या ॥
इत्याद्यनेकान्तजयपताकोद्द्योतटिप्पणकं समाप्तम् ॥
संवत् १६५५ वर्षे श्रावणसुदि १० बुधे लिखितमिदम् ।
(अन्यदीयहस्ताक्षरेण लिखितमिदम्—)
संविग्नेनान्तिषदा तपगणपतिविजयसेनसूरीणाम् ।
श्रीरामविजयकृतिना चित्कोशे प्रतिरियं मुक्ता ॥

[576]

अन्तः—इति श्रीमत्तपागच्छालङ्कारहारभट्टारकघटकोटिरश्रीसोमजयसूरिशिष्यशिरोमणि—श्रीइन्द्रनन्दिसूरिराजविनेयाणुश्रीसिद्धान्तसारकलिते श्रीदर्शनरत्नरत्नाकरग्रन्थे श्रीमदनुगमापरपर्याये तुर्यलहर्यां भगवन्निर्वाण-भर्तृनिर्वाणनामा संपूर्णस्तृतीयस्तरङ्गस्तत्समाप्तौ च समाप्ता तुर्यलहरी तत्पूर्णीभवने च पूर्णनामाऽगमत् श्रीदर्शनरत्नाकरग्रन्थः ॥

श्रीमत्कौटिकगच्छकाननवरे श्रीवज्रशाखामहा-
वल्लीव प्रसमार तत्र समभूच्चान्द्रं कुलं गुच्छवत् ।
तस्मिन् सारफलोपमः समभवद् गच्छोत्तमः श्रीजग-
च्चन्द्राचार्यतपस्कृतेः क्षितितले ख्यातस्तयाऽभिख्यया ॥१॥
तत्पट्टैकविभूषणं समभवद् देवेन्द्रसूरीश्वरा-
स्तत्पट्टे किल धर्मघोषगुरवः सोमप्रभाः सूरयः ।

तत्पट्टाम्बरसोमसोमतिलकाचार्या अजायन् ततः
तत्पट्टोद्द्योतकदेवसुन्दरगुरुश्रेष्ठा विशिष्टा गुणैः ॥२॥
श्रीसोमसुन्दरगुरुप्रवरास्तु तेषां पट्टेऽभवन् भुवि गुणैर्विदिताः स्वकीयैः।
ते सूरयः सुविहिता मुनिसुन्दराख्याः सूरीन्द्रसूरिजयचन्द्रमुख्यास्तु पञ्च ॥३॥
श्रीरत्नशेखराद्या श्रीमुनिसुन्दरगुरोस्तु संताने।
अभवन् सूरिप्रवरा नैके विद्यावदातधियः ॥४॥
श्रीजयचन्द्रगुरूणां कृष्णब्राह्मीतिलब्धबिरुदानाम्।
श्रीसोमजयाचार्या अभवन् शिष्येषु मुख्यतमाः ॥५॥
तेषां नैकेऽभूवन् शिष्याः श्रीइन्द्रनन्दिसूरीन्द्राः।
श्रीअमरनन्दिवाचकवरास्तु पं० नन्दि–सहजाख्याः ॥६॥
वरराजसोमपण्डित–वादिवरानन्द-सहजनामानौ।
पण्डितवरेन्द्रसारा इति नैकपण्डितास्तेषाम् ॥७॥
श्रीमत्सोमजयाभिधानगुरुणा दत्तव्रते [च] क्रमात्
श्रीमत्सूरिवरेन्द्रनन्दिसुगुरौ संप्राप्तविद्येन च।
संसारात् स्वयमिन्द्रसारगुरुणा निस्तारितेनार्णवात्
ग्रन्थोऽयं विहितः परोपकृतये सिद्धान्तसारेण तु ॥८॥
विक्रमतः सप्तति-तिथिमित(१५७०)वर्षे विरचितः ग्रन्थः।
.... श्रीदर्शनरत्नाकराख्योऽयम् (?) ॥९॥

अङ्गोपाङ्ग-छेदोत्तराध्ययनसूत्र-पिण्डनिर्युक्तिः-आवश्यकनिर्युक्तिप्रमुखान्युपजीव्य-सूत्राणि ॥१०॥

श्रीहेमसूरिरचिताऽऽदिमजिनचरितानुसारतोऽग्रन्थि।
ते ग्रथयन्त्वविरुद्धं तच्छोध्यं बुधवरैः सुधिया ॥११॥

इति श्रीदर्शनरत्नाकरग्रन्थोऽयं समाप्तोऽस्तु संपूर्णम्। संवत् १९६१ वर्षे मृगसिर कृष्णपक्षे चतुर्थ्यां शनिवासरे लिपीचक्रे र० मे० भगवानसिंहेन।

[587]

अन्तः—समाप्तमष्टमपरिच्छेदविवरणम्। तत्समाप्तौ च रत्नाकरावतारिका-पञ्जिका सिद्धिसौधमध्यमध्यासामास ॥

श्रीस्थूलभद्रवंशे हर्षपुरीये क्रियानिधौ गच्छे।
देव्या चक्रेश्वर्या दत्तवरः षष्ठपारणकी ॥१॥

श्रीगूर्जरेन्द्रकर्णोद्घोषितमलधारिविशदवरबिरुदः ।
श्रीअभयदेवसूरिर्निरीहचूडामणिरदीपि ॥२॥
श्रीहेमचन्द्रसूरिस्तच्छिष्यो ग्रन्थलक्षकर्ताऽभूत् ।
श्रीगूर्जरजयसिंहक्षितिपतिनतचलननलिनयुगः ॥३॥
मुनिचन्द्रसूरि-हरिभद्रसूरि-नरचन्द्रसूरयः सर्वे ।
तेषामन्वयतिलकः सूरिः श्रीतिलक इत्युदीरितः ॥४॥
तस्यास्मि प्रियशिष्योऽहं सूरिः श्रीराजशेखरः ।
विद्वत्प्रसादतो ग्रन्थप्रथनारब्धपौरुषः ॥५॥
सोऽहं मोहतमःस्तोमविहस्तजनदीपिकाम् ।
पञ्जिकां रचयामास विनेयजनरञ्जिकाम् ॥६॥
दोषः कश्चन योऽत्राभून्मम प्रातिभमान्धतः ।
दूरे कार्यः स धीमद्भिः कुर्वाणैर्ममतां मयि ॥७॥
पुष्पदन्ताविमौ दीपौ यावद् द्योतयतो जगत् ।
तावन्नन्द्यादयं ग्रन्थो विदग्धजनवल्लभः ॥८॥

समाप्ता पञ्जिका ॥ संवत् विष्टप–शिपिविष्टदृष्टि–विशाखमुख-शिशिराभीशुपरिमितपरवाणौ (१६३३) वैशाखवदि ११ वासरे रविवारे । श्रीमद् बृहत्खरतरगच्छाधीशश्रीजिनभद्रसूरिपदकुमुदचन्द्र-श्रीजिनचन्द्रसूरिभूरिगुणमणिसमुद्रश्रीजिनसमुद्रसूरिपट्टोदयाचलचूलालंकरणहंसश्रीजिनहंससूरिराजानां शिष्यमुख्य–श्रीपुण्यसागरमहोपाध्यायपदपुण्डरीकचञ्चरीकेण पद्मराजमुनिना लिखितेयं स्ववाचनाय । श्रीमज्जेसलमेरुमहादुर्गे । श्रीरस्तु ॥

[606]

अन्तः–पण्डित श्रीरूपचन्द्रगणिभिर्विरचिता, शोधिता च श्रीपण्डितश्रीचन्द्रगणिभिः

वृत्ति-अन्तः––श्रीहीरविजयसूरीश्वरा बभूवुर्जगत्त्रयीविदिताः ।
तद्वाचका महोदयराजः श्रीभानुचन्द्राह्वाः ॥१॥
जयन्तु ते वाचकभानुचन्द्राः अभ्यस्तसद्वाङ्मयवीततन्द्राः ।
ये मानसे हंसतया बभूवुरकब्बरक्षोणिपतेः सुभूपतेः ॥२॥
श्रीभानुचन्द्रामलपट्टचारुप्रासादशृङ्गार्जुनकुन्तकल्पाः ।
ते सन्तु चारूदयचन्द्रसन्तः सुखाय नः सूरिकलालसन्तः ॥३॥
सर्वार्थसार्थाकृतिकामधेन्वाः यस्य प्रसादाद् गुणचक्रधाम्ना ।
षट्त्रिंशिकायाः किल रूपचन्द्रो वृत्तिं चकारोदयचन्द्रशिष्यः ॥४॥

संवत् शरर्त्वङ्ग-निशेश(१६७५)वर्षे ज्येष्ठस्य कृष्णेतरचारुपक्षे ।
षष्ठ्यां तिथौ वाक्पतिवर्यवारे स्वस्यावबोधाय विनिर्मितेयम् ॥५॥
ग्रन्थाग्रं गणितं सर्वं संख्ययाऽत्र विनिश्चितम् ।
षट्शतं पञ्चविंशत्यधिकं जातमनुष्टुभाम् ॥६॥

संवत् १६७५ वर्षे षट्त्रिंशिकावृत्तिः तपागच्छे शत्रुञ्जयकरमोचनादि-सुकृतकारिमहोपाध्यायश्री११श्रीभानुचन्द्रगणिचरणनलिनमधुव्रतायमानपण्डितश्रीरूपचन्द्र-गणिना विरचिता श्रीरामनगरे वृत्तिकारकस्य पठन-पाठनयोश्च शुभं भूयादिदं पुस्तकं चिरं नन्दतु आचन्द्रार्कं संवद् रसेन्दुब्धि-भूरिति(१७१६) वर्षे प्रोष्ठावदातत्रयोदशी-शितवर्यवारे लिखति ॥

[611]

अन्तः— वेद-वेदर्षि-चन्द्रेऽब्द इष (?) आसोसितपक्षतौ ।
विवत्रे तत्र वृत्तिश्च लावण्याह्वयवाचकैः ॥१॥
यावन्मही मृगाक्षीयं धत्ते वारिधिमेखलाम् ।
वाच्यमाना बुधैर्जीयात् सवृत्तिर्द्रव्यसततिः ॥२॥
तर्कादिशास्त्रनिपुणैर्वैराग्यामृतसागरैः ।
शोधितेयं श्रिये श्रीमद्विद्याविजयकोविदैः ॥३॥

संवत् १८५३ वर्षे फागुणसुदि ८ वारचन्द्रे लखावितम् । सा० श्रीवृजमजी लखावितं उपकारार्थम् ॥

[628]

अन्तः— अर्हं विनिहितदोषः सततं भव्यव्रजवारिजातकृतबोधः ।
गोभिः सकलपदार्थं प्रकटयिता जयति वीररविः ॥१॥
गौतम-सुधर्म्ममुख्याः प्रख्या आसन् गणाधिपा गुणिनः ।
तत्क्रमवर्ती श्रीजिनचन्द्रश्चन्द्रति युगप्रवरः ॥२॥
तस्मिन् गणेऽपि विजयिनि ढिल्लीनाथप्रबोधतपनिष्ठे ।
श्रीमति जिनसिंहाभिधसूरिवरे जयति युवराज्ये ॥३॥
श्रीमत्सागरचन्द्रसूरय इति क्षान्ताः क्षितौ धीधनाः
पञ्चानां परमेष्ठिनामिह चये प्राप्तास्तृतीये पदे ।
दत्तं श्रीजिनभद्रसूरिसुगुरोः सूरेः पदं यैरभूत्
तेषां शुद्धगुणान्वये विजयिनो व्यक्ता इमे जज्ञिरे ॥४॥

श्रीमहिमराजसुदयोदया दयासागरा वरा विद्वांसः ।
श्रीज्ञानमन्दिराह्वाश्रयोऽप्यमी वाचकवतंसाः ॥५॥
श्रीदेवदेवतिलकोपाध्यायाश्चक्रवर्तिनो विज्ञाः ।
तच्छिष्यानूचानाः श्रीमन्तो विजयराजाह्वाः ॥६॥
वाचंयमजननिकरे कोटीरसमाः समागमार्थज्ञाः ।
तच्छिष्यपद्ममन्दिरगणिरर्थप्रदीपमिमम् ॥७॥
बालावबोधमकरोद् विबुधबोधाय निजकवि[त्व]वृद्धयै ।
यदशुद्धमत्र किञ्चित् तज्ज्ञैः शोध्यं घृणावद्भिः ॥८॥
सुगुणगणिकनकसारो मेहाजलसाधु-साधुरिणमल्लौ ।
लिखन-सुशोधनकर्मण्येते साहाय्यकर्तारः ॥९॥
विषमपदार्थपूर्वसाहहमीरोपरोधतश्चक्रे ।
तत एतर्हि समग्रोऽभ्यर्थनयाऽलेखि साध्वीनाम् ॥१०॥
वर्षे शशि बाण-रसा-त्रिदिग्गजमाने(१५१३)सहः सितपक्षे ।
लक्ष्मीधरे वारे गुरौ च पूर्णीकृतो ग्रन्थः ॥११॥

इति श्रीप्रवचनसारोद्धारसंपूर्णम् ॥

सं० १८३७ प्रमिते कार्तिकमासे बहुलपक्षे तृतीयातिथौ भौमवारे इदं(यं) पुस्तिका संपूर्णा । पं० कीर्तिहेम लिपीकृता श्रीपाटोधीमध्ये चतुर्मास्यां चक्रे ।

[631]

अन्तः— सपादलक्षक्षोणीशसमक्षं जिनवादिनाम् ।
श्रीधर्मघोषसूरीणां पट्टालंकारकारकाः ॥१॥
त्रिवर्गपरिहारेण गद्यगोदावरीसृजः ।
बभूवुर्भूरिसौभाग्याः श्रीयशोभद्रसूरयः ॥२॥
स्व-परसमयज्ञानप्रीतप्रकृष्टजगज्जना-
श्चतुरवचनामोदापृष्टाममरेशगुरुप्रभाः ।
अभिनृपसभं गङ्गागौरप्रनर्तितकीर्त्तय-
स्तदनु महसः पात्रं जाता रविप्रभसूरयः ॥३॥
एवं प्रवचनसारे तच्छिष्यलवश्चकार टिप्पनकम् ।
श्रीउदयप्रभसूरिर्विषमपदार्थावबोधाख्यम् ॥४॥
इह सन्ति तेऽपि सिद्धान्तसिन्धुपारीणबुद्धयः ।
सुधियः हृद्यात्मभुवां येषां कौसुम्भरत्नायते विश्वम् ॥५॥

प्रवचनसारोद्धारश्रियः समस्ताङ्गसङ्गसुभगानाम् ।
स्यात् तद्विचारचर्चा तेषामेषा प्रमोदाय ॥६॥
प्रवचनसारं सारं विषमपदार्थावबोधतः सत्यम् ।
उदयात् सवितुर्विश्वविधमपि सजीवमाभाति ॥७॥
सर्वप्रकारसाहाय्यकारिणः क्षान्तिशालिनः ।
जयप्रभस्य कृतिनः प्रयत्नादेष निर्मितः ॥८॥
अवधानवन्ध्यबुद्धिर्यदत्र न समञ्जसम् ।
उक्तवानहमुत्सूत्रं तत्र मिथ्याकृतं मम ॥९॥
यद्वा यदत्र किञ्चित् तनुमतिभिर्दोषमुदितमस्माभिः ।
प्रीतास्तद्धीमन्तः सन्तः कुर्वन्तु निर्दोषम् ॥१०॥

ग्रन्थाग्रम् ३३०३॥

[651]

अन्तः—शास्त्रान्तरेषु परिवीक्षितमर्थजातं
प्रायो मया विवृतमत्र न तु स्वबुद्ध्या ।
यत् स्यात् तथापि ननु सूत्रविरुद्धमुक्तं
तत् सूरिभिर्मयि कृपाकलितैर्विशोध्यम् ॥१॥
यस्माद् गभीरतरसूक्ष्मपदार्थजाते
छद्मावृतस्य नितरां विदुषोऽपि बुद्धिः ।
प्रायः स्खलत्यदृढशास्त्रपरिश्रमाणां
कर्म्मोदयाज्जडधियां किमु मादृशानाम् ॥२॥
संपूर्णनिर्मलकलाकलितं सदैव जाड्येन वर्जितमखण्डितवृत्तभावम् ।
दोषानुषङ्गरहितं नितरां समस्ति चान्द्रं कुलं स्थिरमपूर्वशशाङ्कतुल्यम् ॥३॥
तस्मिंश्चरित्रधनधामतया यथार्थाः संजज्ञिरे ननु धनेश्वरसूरिवर्याः ।
नीहारहारहरहासविकाशिकाश-संकाशकीर्तिनिवहैर्धवलीकृताशाः ॥४॥
ये निःसंगविहारिणोऽमलगुणा विश्रान्तविद्याधर—
व्याख्यातार इति क्षितौ प्रविदिता विद्वन्मनोमोदिनः ।
ये तुष्टा विजनेषु सांप्रतमपि ते प्राप्तोपमाः सर्वत—
स्तेभ्यस्तेऽजितसिंहसूरय इहाभूवन् सतां संमताः ॥५॥
उद्दामधामभवजन्तुनिकामवामकामेभकुम्भतटपाटनसिंहपोताः ।
श्रीवर्धमानमुनिपाः सुविशुद्धबोधाः तेभ्योऽभवन् विशदकीर्तिवितानभाजः ॥६॥

लोकानन्दपयोधिवर्धनवशात् सद्वृत्तसंगतेः
सौम्यत्वेन कलाकलापकलनात् श्लाघ्योदयत्वेन च ।
ध्वस्तध्वान्ततया ततः समभवंश्चन्द्रान्वयं सान्वयं
कुर्वाणाः शुचिशालिनोऽत्र मुनिपाः श्रीशीलभद्राभिधाः ।।७।।
निःसंख्यैरपि लब्धमुख्यगणनैराशाविकाशं सतां
कुर्वाणैरपि संकटीकृतदिगाभोगैर्गुणिप्रीणकैः ।
श्वेतैरप्यनुरञ्जितत्रिभुवनैर्येषां विशालैर्गुणै-
श्चित्रं कोऽपि यशःपटः प्रकटितः श्वेतो विचित्रैरपि ।।८।।
सत्तर्ककर्कशधियः शुचिशुद्धबोधाः
सुव्यक्तसूक्तशतमौक्तिकशुक्तिकल्पाः ।
तेषामुदारचरणाः प्रथमाः सुशिष्याः
सद्योऽभवन्नजितसिंहमुनीन्द्रवर्याः ।।९।।
तेषां द्वितीयशिष्या जाताः श्रीमद्धनेश्वराचार्याः ।
सार्धशतकस्य वृत्तिं गुरुप्रसादेन ते चक्रुः ।।१०।।
शशि-मुनि-पशुपति(११७१) संख्ये वर्षे विक्रमनृपादतिक्रान्ते ।
चैत्रे सितसप्तम्यां समर्थितेयं गुरौ वारे ।।११।।
युक्तायुक्तविवेचन-संशोधन-लेखनैकदक्षस्य ।
निजशिष्यस्य सुसाहाय्याद् विहिताऽसौ पार्श्वदेवगणेः ।।१२।।
प्रथमादर्शे वृत्तिं सम.....

[660]

अन्तः—इति पद्मचरित्रं समाप्तमिति । मङ्गलं महाश्रीः ।।
अत्यद्भुतोन्नतिविराजिनि यत्र राजा
प्राप्ते क्रमेण घनमूर्ज्जितमण्डलश्रीः ।
छत्रश्रियं दधदघात् पदसंन्निवेशं
श्रीभिल्लमालवसतिः स समस्ति वंशः ।।१।।
तत्र भूधरधरावतंसके धर्ममूर्तिरजनिष्ट जंबकः ।
अत्यजद्भिरपि यद्गुणग्रहं मार्गणैर्बत गतं दिगन्तरे ।।२।।
बभूव शाखिनस्तस्य नेढाकः सत्फलं सुतः ।
कृता येनोन्नता चित्रं शाखा वृद्धिमुपेयुषा ।।३।।
दयिता समभूत् तस्य शुद्धबुद्धिनिधिः प्रिया ।
सच्छाया कल्पशाखाऽपि नैव या विपदास्पदम् ।।४।।

दादाकः समभूत् ताभ्यां नवीनः कोऽपि नीरधिः ।
गुरोः कलानिधिर्येन मुक्तसङ्गो न जातुचित् ॥५॥
कान्ता बालमतिस्तस्य बभूव विलसद्गुणा ।
शीलशाला विशालाऽपि या चित्रं स्तम्भवर्जिता ॥६॥
श्रीसज्जनोऽजनि तयोः प्रथमस्तनूजो
लीलावतीललितदुर्ललिताङ्गयष्टिः ।
तच्चापलं किल विमोचयितुं गुणैः स्वै-
र्लक्ष्मीर्निबध्य विधृता ध्रुवमेव येन ॥७॥
शोभाभिधानस्तदनन्तरोऽभूद् गिरो गुरूणामनिशं विकस्वराः ।
श्रोत्रावतंसश्रियमादधानाः पुष्णन्ति लक्ष्मीललितानि यस्य ॥८॥
गुणश्रेणीमुक्तावलिकलनलीलाञ्चिततनु-
स्तृतीयः श्रीवीरः समजनि कलाकेलिवसतिः ।
यशोहंसो यस्योत्तमनिखिललोकस्फुरदुरः-
सरःक्रोडे क्रीडन्मुदमकृत केषां न कृतिनाम् ? ॥९॥

इतश्च—

अत्रैव वंशे संजज्ञे जज्जुको महिमास्पदम् ।
श्रेयसी प्रेयसी तस्य वीजीति समजायत ॥१०॥
श्रीवीरकाऽजायत तत्तनूजा सुधां स्रवन्ती स्वकरैः स्वगोभिः ।
विभर्ति या सोमकला विचित्रं न वक्रभावं न भवाभिषङ्गम् ॥११॥
अथ दोषात्ययशुद्धां पूर्वामिव वीरकामिमामुदितः ।
भानुरिव वीरनामा प्रभानिधिः प्रणयिनीमकरोत् ॥१२॥
प्रबुद्धमतिवैभवः स्फुरदमन्दपुण्योदय-
स्तयोरजनि राणकः सुतशिरोमणिर्विश्रुतः ।
यदीयगुणसंकथा सकललोकवक्त्राङ्गणे
प्रभृत्यतिसुहृज्जनप्रथितसम्मदं सर्वदा ॥१३॥
व्ययकरणव्यापारं यः कुर्वाणोऽपि यत्तनेऽद्यापि ।
निजशुद्धबुद्धिवशतो राजश्रीवृद्धिमातनुते ॥१४॥
अपरा चन्दुका जज्ञे तनया विनयास्पदम् ।
गुणग्रामलसद्धाम विपद्वल्ली कुठारिका ॥१५॥

अभूतां तनयौ यस्याः श्रियः क्रीडावतंसकौ ।
आद्यो विजयपालाख्यो पृथ्वीपालस्ततोऽपरः ॥१६॥
आद्या शृङ्गारदेवीति राणकस्याभवत् प्रिया ।
लीलुकाऽजनि तत्पुत्री पवित्रमतिशालिनी ॥१७॥
यशोदेवी द्वितीया च यशःकुमुदचन्द्रिका ।
जज्ञिरे गुणिनो यस्यास्तनयाः सुनयालयः ॥१८॥
आद्यो वाग्भटनामाऽभूत् त्यागलालसमानसः ।
श्रितवासश्रियोऽभुवन् यदीययशसा दिशः ॥१९॥
विश्रामधामकीर्तीनां रत्नपालो द्वितीयकः ।
अभूत् सा०धनपालाख्यस्तृतीयः श्रीनिकेतनम् ॥२०॥
जयतलदेवीमाद्यस्तेजलदेवीं तथा परो विधिना ।
उपयेमे पुनरपरः सुयशाः सौभाग्यदेवीं च ॥२१॥
पत्नी सोमलदेवी च तृतीया मन्त्रिणोऽभवत् ।
शाला विशदशीलस्य क.....

[668]

अन्त—संवत् १५१६ वर्षे मागसर शुदि ५ दिने नलग(?क)च्छवासि-प्राग्वाटवंशसाहदेगाल-भार्यादेल्हणदे-सुत सा० लीबाकेन भार्यासाणी-पुत्रलालापुत्री-इलाषू भग(गि)नी धनी भ्राता हापा भार्या गुरी पुत्र गोपा-महिपा-झांझण-कुइरि समस्तकुटुम्बयुतेन पञ्चम्युद्यापनार्थं पञ्चग्रन्था लिखापिताः, तपागच्छाधिराजश्रीसोम-सुन्दरसूरि-शिष्यसोममङ्गलगणिभिः नन्दिमङ्गलगणीनामर्पिता ॥

[683]

अन्तः—संवत् १८८० वर्षे शाके १७४६ प्रवर्त्तमाने महामाङ्गलिकप्रद-मासोत्तममासे वैशाखमासे कृष्णपक्षे चतुर्दश्यां तिथौ बुधवासरे लिखिता । सकल-पण्डितशिरोमौलिमुकुटायमानमहोपाध्यायश्रीसागरजी-तच्छिष्यचरणसेवितप्रवरपण्डित-शिरोरत्नपण्डित श्रीकुशलसागरजी-तच्छिष्यमौलिमुकुटायमानपं० श्रीउत्तमसागरजी-तच्छिष्यचरणसेवकप्रवरपण्डितश्रीकान्तिसागरजीगणिशिष्य-प्र० पं० श्रीइन्द्रसागरजी-तच्छिष्यप्र०पं० उदयसागरजीगणि-तच्छिष्यपं० श्रीसुमतिसागरजी तच्छिष्यपं० विवेक-सागरजीगणिनाऽलेखि, काननपुरनगरे ॥

नाम ठाम गुर देव अरु अल्यर जे लोपंत ।
ते नर जनम जनम लग कुंभि नरक पडंत ॥
श्रीपार्श्वनाथजीप्रसादात्, श्रीकल्याणमस्तु ॥

[685]

अन्तः—श्रीऊकेशिगणे गुणौघरुचिरे श्रीकक्कसूरिर्गुरु—
स्तच्छिष्यो मतिसुन्दरः श्रुतनिधिर्विद्वानभून्निर्मलः ।
तच्छिष्यो मुनिदेवसुन्दर इतष्टीकां व्यधाद् यां नवां
तस्यां श्रीउपदेशदानचरितस्यामूत् तृतीयं शतम् ॥

[688]

अन्त— जयति भुवनैकसूरः सर्वत्राविहितकेवलालोकः ।
नित्योदयः स्थिरस्तापवर्जितो वर्धमानजिनः ॥१॥
श्रीवीरवक्त्रात् त्रिदशीमवाप्य यो द्वादशाङ्गीं विमलां चकार ।
स्वामी सुधर्मा सकलर्षिशास्ता जीयात् स्वकीयान्वयवृद्धिकर्ता ॥२॥
चान्द्रे कुले श्रीविधिपक्षगच्छस्तत्राभवत् साधुपधर्ममूर्तिः ।
तदीयपट्टे शिवसिन्धुसूरिस्तत्स्थानके श्रीअमराब्धिसूरिः ॥३॥
तत्पट्टाम्बुजभास्करा भृशधियो दुर्वादिदन्तावलं
हर्यक्षा उपकेशवंशजनुषो रोषादिदोषद्विषः ।
निर्णीतागमशब्दशास्त्रविषया उद्योगिनोऽध्यापने
विद्यासागरसूरयो युगवरा विश्वप्रियाः स्वर्ययुः ॥४॥
तत्पदाम्भोजमधुपः सूरिश्रीउदयोदधिः ।
स्नात्रपञ्चाशिकाग्रन्थं रचयामास हर्षतः ॥५॥
वर्षेऽब्धि-खाहीन्दु(१८०७)मिते सुरम्ये श्रीपोषमासे च वलक्षपक्षे ।
श्रीपूर्णिमायां शशिवासरे च श्रीपादलिप्ताख्यपुरे सुराष्ट्रे ॥
श्रीयोगविमलसाधोस्तथा श्रीदर्शनाम्बुधेः ।
अभ्यर्थनया रचितो ग्रन्थोऽयं बोधिलब्धये ॥७॥
श्रीमालिवंशे गुरु-देवभक्तः कीकासुतः सा०कचराभिधानः ।
तदीयसंघेन समं च यात्रां कुर्वन् कृतोऽयं जिनराजभक्त्यै ॥८॥
यावल्लवणसमुद्रो यावन्मेरुमहीधरः ।
यावच्चन्द्रादित्यौ तावन्नन्दत्वयं ग्रन्थः ॥९॥
अर्हन्तो मङ्गलं मे स्युः सिद्धाश्च मम मङ्गलम् ।
साधवो मङ्गलं मे स्युः जैनो धर्मोऽस्तु मङ्गलम् ॥१०॥

इति प्रशस्तिः समाप्ता ॥ श्रीआदीश्वरप्रसादात् । संवत् १८०७ वर्षे आषाढमासे शुक्लपक्षे तृतीयातिथौ सोमवासरे श्रीराजनगरमध्ये लिपीकृतम् ॥

[692]

अन्तः— श्रीभक्तिलाभशिष्येण चारुचन्द्रेण गुम्फिता ।
चारित्रसारगणिना शोधिता हितकारिणा ॥१॥
बालत्वेऽपि कथा चेयमभ्यासार्थं कृता मया ।
बालावस्थाकृतं सार्वमहतां प्रीतये भवेत् ॥२॥
सुपात्रदानमाहात्म्यप्रकाशे ये परायणाः ।
श्रीउत्तमचरित्रस्य कथेयं नन्दताच्चिरम् ॥३॥
श्रीउत्तमचरित्रकथा समाप्ता ॥

[700]

